सेव् + ल्युट् (यु = अन)	=	सेवनम्

© NCERT not to be republished

अभ्यासकार्यम्

प्र. 1. उदाहरणमनुसृत्य पदेषु प्रयुक्तान् प्रकृतिप्रत्ययान् लिखत—

	पदम्	प्रकृति:	प्रत्यय:
उदाहरण—	**गति:**	**गम्**	**क्तिन्**
i)	हसनम्	....	....
ii)	पाठक:	....	....
iii)	खाद्य:	....	....
iv)	दृश्य:	....	....
v)	भक्ति:	....	....
vi)	सौभाग्यशालिन्	....	....
(vii)	नेता	....	....
(viii)	गायक:	....	....

प्र. 2. अधोलिखितप्रत्ययानां प्रयोगेण पञ्च, पञ्च पदानि रचयित्वा स्वपुस्तिकासु लिखत— तृच्, क्तिन्, ण्वुल्, ल्युट्, यत्।

प्र. 3. अधोलिखितवाक्येषु स्थूलपदेषु क: प्रत्यय: प्रयुक्त: इति कोष्ठकेभ्य: चित्वा लिखत—

i) सज्जनानाम् **उक्ति:** पालनीया। (ल्युट्/क्तिन्) ....

ii) **सेचक:** क्षेत्रं सिञ्चति। (ल्युट्/ण्वुल्) ....

iii) **श्रावक:** कथां श्रावयति। (ल्युट्/ण्वुल्) ....

iv) भक्त: **भक्तिं** करोति। (ण्वुल्/क्तिन्) ....

प्र. 4. शुद्धरूपं चित्वा लिखत—

i) गम् + क्तिन् — गति: / गमति: ....

ii) दा + तृच् — दातृ / दानी ....

iii) नी + ण्वुल् — नाविक: / नायक: ....

iv) नृत् + ल्युट् — नर्तक: / नर्तनम् ....

v) दृश् + ल्युट् — दृश्यम् / दर्शनम् ....

© NCERT not to be republished

2. तद्धित प्रत्यय

- संज्ञा, विशेषण तथा कृदन्त आदि (प्रातिपदिक) शब्दों के साथ लगकर अर्थ परिवर्तन करने वाले प्रत्ययों को **तद्धित** प्रत्यय कहते हैं।
- तद्धित प्रत्ययान्त शब्दों में कारक विभक्तियाँ लगती हैं।

विभिन्न अर्थों में प्रयुक्त होने वाले तद्धित प्रत्यय अनेक हैं। कतिपय प्रमुख तद्धित प्रत्ययों का परिचय यहाँ दिया जा रहा है—

मतुप् (मत्)

'वाला' अर्थात् 'इसके पास है', इस अर्थ में स्वरान्त शब्दों से 'मतुप्' प्रत्यय का योग किया जाता है। 'उप्' का लोप होकर शब्दों से केवल 'मत्' जुड़ता है।

उदाहरण—

शक्ति + मतुप्	=	शक्तिमत् (शक्तिमान्), शक्तिवाला
श्री + मतुप्	=	श्रीमत् (श्रीमान्), श्रीवाला
धी + मतुप्	=	धीमत् (धीमान्), बुद्धिवाला
बुद्धि + मतुप्	=	बुद्धिमत् (बुद्धिमान्), बुद्धिवाला
मधु + मतुप्	=	मधुमत् (मधुमान्), मधुवाला
इक्षु + मतुप्	=	इक्षुमत् (इक्षुमान्), गन्नेवाला
कीर्ति + मतुप्	=	कीर्तिमत् (कीर्तिमान्), कीर्तिवाला

वतुप् (वत्)

- 'वाला' या 'इससे युक्त' अर्थ में अकारान्त तथा अनेक हलन्त शब्दों से 'वतुप्' (वत्) प्रत्यय होता है।
- 'शब्दान्त' या 'उपधा' में अ/आ या म् होने पर मतुप् के स्थान पर 'वतुप्' प्रत्यय लगता है।

उदाहरण—

धन + वतुप्	=	धनवत् (धनवान्), धनवाला
बल + वतुप्	=	बलवत् (बलवान्), बलवाला

© NCERT not to be republished

रूप + वतुप् = रूपवत् (रूपवान्), रूपवाला

विद्या + वतुप् = विद्यावत् (विद्यावान्), विद्यावाला

गुण + वतुप् = गुणवत् (गुणवान्), गुणवाला

लक्ष्मी + वतुप् = लक्ष्मीवत् (लक्ष्मीवान्), लक्ष्मीवाला

- मतुप्, वतुप् प्रत्ययों से युक्त शब्दों के रूप पुँल्लिङ्ग में 'भवत्', स्त्रीलिङ्ग में 'नदी' तथा नपुंसकलिङ्ग में 'जगत्' शब्द के समान चलते हैं।

इनि (इन्)

- 'वाला' या 'युक्त' अर्थ में अकारान्त शब्दों से 'इनि' (इन्) प्रत्यय का योग किया जाता है।

उदाहरण—

रथ + इनि = रथिन् (रथी), रथवाला या रथ से युक्त

दण्ड + इनि = दण्डिन् (दण्डी), दण्डवाला या दण्ड से युक्त

बल + इनि = बलिन् (बली), बलवाला या बल से युक्त

गुण + इनि = गुणिन् (गुणी), गुणवाला या गुण से युक्त

धन + इनि = धनिन् (धनी), धनवाला या धन से युक्त

- वाक्यों में इनि प्रत्यय युक्त शब्दों का आवश्यकतानुसार शब्दरूप बनाकर प्रयोग किया जाता है।

यथा— गुणी जन: शोभते। (प्रथमा, एकवचन)

गुणिन: सर्वत्र पूज्यन्ते। (प्रथमा, बहुवचन)

धनिन: अद्यत्वे अधिकं धनं लब्धुं यतन्ते। (प्रथमा, बहुवचन)

बलिना पुरुषेण सर्वत्र बलस्य एव प्रयोग: क्रियते। (तृतीया, एकवचन)

तरप् (तर)

- दो में किसी एक को बेहतर बताने के लिए 'तरप्' प्रत्यय का प्रयोग किया जाता है।

© NCERT not to be republished

उदाहरण—

प्रशस्य + तरप्	= प्रशस्यतर:	चतुर + तरप्	= चतुरतर:
गुरु + तरप्	= गुरुतर:	दीर्घ + तरप्	= दीर्घतर:
लघु + तरप्	= लघुतर:	सुन्दर + तरप्	= सुन्दरतर:
पटु + तरप्	= पटुतर:	स्थिर + तरप्	= स्थिरतर:
कुशल + तरप्	= कुशलतर:	तीव्र + तरप्	= तीव्रतर:
उच्च + तरप्	= उच्चतर:	मधुर + तरप्	= मधुरतर:

यथा— रामलक्ष्मणयो: राम: प्रशस्यतर: आसीत्। अश्वगजयो: अश्व: तीव्रतर:। मोहनसोहनयो: मोहन: पटुतर:।

तमप् (तम)

- दो से अधिक में किसी एक की सर्वश्रेष्ठता प्रकट करने के लिए 'तमप्' प्रत्यय का प्रयोग किया जाता है।

उदाहरण—

उच्च + तमप्	= उच्चतम:	मधुर + तमप्	= मधुरतम:
गुरु + तमप्	= गुरुतम:	दीर्घ + तमप्	= दीर्घतम:
लघु + तमप्	= लघुतम:	स्थिर + तमप्	= स्थिरतम:
पटु + तमप्	= पटुतम:	सुन्दर + तमप्	= सुन्दरतम:
कुशल + तमप्	= कुशलतम:	तीव्र + तमप्	= तीव्रतम:

यथा— कक्षाया: छात्रेषु मोहन: पटुतम:, पशुषु अश्व: धावने तीव्रतम: इत्यादि

मयट् (मय)

- प्रचुरता के अर्थ में 'मयट्' (मय) प्रत्यय का प्रयोग किया जाता है।
- वस्तुवाचक शब्दों से (खाद्य वस्तुओं को छोड़कर) विकार अर्थ में भी मयट् प्रत्यय का प्रयोग किया जाता है।

उदाहरण—

शान्ति + मयट्	=	शान्तिमय:
आनन्द + मयट्	=	आनन्दमय:

© NCERT not to be republished

सुख + मयट्	=	सुखमयः
तेजः + मयट्	=	तेजोमयः
मृत् + मयट्	=	मृण्मयः
स्वर्ण + मयट्	=	स्वर्णमयः
लौह + मयट्	=	लौहमयः

अण् (अ)

- अपत्य (पुत्र या पुत्री) अर्थ में शब्द से अण् प्रत्यय का योग किया जाता है। अण् प्रत्यय करने पर आदि स्वर की वृद्धि होती है।

उदाहरण—

वसुदेव + अण्	=	वासुदेवः	मनु + अण्	=	मानवः
वशिष्ठ + अण्	=	वाशिष्ठः	पुत्र + अण्	=	पौत्रः
विश्वमित्र + अण्	=	वैश्वामित्रः	कुरु + अण्	=	कौरवः
अश्वपति + अण्	=	आश्वपतः	दनु + अण्	=	दानवः
यदु + अण्	=	यादवः	पण्डु + अण्	=	पाण्डवः

यथा— वासुदेवः कृष्णः पूज्यः अस्ति।

- भाव में भी अण् प्रत्यय होता है—

कुशल + अण्	=	कौशलम्
गुरु + अण्	=	गौरवम्
शिशु + अण्	=	शैशवम्
मृदु + अण्	=	मार्दवम्
लघु + अण्	=	लाघवम्

यथा— कर्मसु कौशलं शोभनम् अस्ति।

ठक् (इक)

- शब्दों से भाव अर्थ में 'ठक्' प्रत्यय का विधान किया जाता है। ठक् का 'इक' हो जाता है तथा शब्द के आदि स्वर की वृद्धि होती है।

उदाहरण—

वाच् + ठक्	=	वाचिक

© NCERT not to be republished

शरीर + ठक्	=	शारीरिक
धर्म + ठक्	=	धार्मिक
कर्म + ठक्	=	कार्मिक
नगर + ठक्	=	नागरिक
भूत + ठक्	=	भौतिक
अध्यात्म + ठक्	=	आध्यात्मिक

इतच् (इत)

- 'सहित' या 'युक्त' अर्थ में तारक आदि शब्दों से 'इतच्' प्रत्यय का योग किया जाता है।

उदाहरणम्—

तारक + इतच्	=	तारकित:	बुभुक्षा + इतच्	=	बुभुक्षित:
पिपासा + इतच्	=	पिपासित:	कण्टक + इतच्	=	कण्टकित:
कुसुम + इतच्	=	कुसुमित:	गर्व + इतच्	=	गर्वित:
क्षुधा + इतच्	=	क्षुधित:	व्याधि + इतच्	=	व्याधित:
अंकुर + इतच्	=	अंकुरित:	उत्कण्ठा + इतच्	=	उत्कण्ठित:
हर्ष + इतच्	=	हर्षित:	तरंग + इतच्	=	तरंगित:
दीक्षा + इतच्	=	दीक्षित:			

यथा— बुभुक्षित: किं न करोति पापम्।
क्षुधित: बालक: इतस्तत: भ्रमति।
पिपासित: काक: जलम् अन्वेषयति।

त्व तथा तल्

- भाववाचक संज्ञा बनाने के लिए शब्दों से 'त्व' और 'तल्' (ता) प्रत्ययों का योग किया जाता है।

उदाहरण—

मूर्ख + त्व	=	मूर्खत्वम्	मूर्ख + तल्	=	मूर्खता
विद्वस् + त्व	=	विद्वत्वम्	विद्वस् + तल्	=	विद्वत्ता

© NCERT not to be republished

महत् + त्व	= महत्त्वम्	महत् + तल्	= महत्ता
पवित्र + त्व	= पवित्रत्वम्	पवित्र + तल्	= पवित्रता
पशु + त्व	= पशुत्वम्	पशु + तल्	= पशुता
गुरु + त्व	= गुरुत्वम्	गुरु + तल्	= गुरुता
लघु + त्व	= लघुत्वम्	लघु + तल्	= लघुता
मित्र + त्व	= मित्रत्वम्	मित्र + तल्	= मित्रता

- 'त्व' प्रत्ययान्त शब्द नपुंसकलिङ्ग में होते हैं। इनके रूप 'फल' शब्द की तरह चलते हैं।
- 'ता' प्रत्ययान्त शब्द स्त्रीलिङ्ग में होते हैं। इनके रूप 'रमा' शब्द की तरह चलते हैं।

यत्

- शरीर के अवयववाची शब्दों से 'होने वाला' इस अर्थ में 'यत्' प्रत्यय का योग किया जाता है।

उदाहरण—

कण्ठ + यत्	= कण्ठे भवम्	कण्ठ्यम्
दन्त + यत्	= दन्ते भवम्	दन्त्यम्
ओष्ठ + यत्	= ओष्ठे भवम्	ओष्ठ्यम्

थाल् (था)

- किम् आदि सर्वनामों से 'प्रकार' अर्थ में 'थाल्' प्रत्यय का योग किया जाता है। थाल् का 'था' शेष रहता है।

उदाहरण—

यद् + थाल्	=	यथा
तद् + थाल्	=	तथा
सर्व + थाल्	=	सर्वथा
उभय + थाल्	=	उभयथा

© NCERT not to be republished

तसिल्

- **प्रयाग + तसिल् = प्रयागतः**— पञ्चमी विभक्ति के अर्थ में 'तसिल्' प्रत्यय का प्रयोग होता है। तसिल् का केवल 'तस्' भाग बचता है। तसिल् प्रत्यय जोड़ने पर जो शब्द बनते हैं, वे अव्यय होते हैं। जब कोई वस्तु या व्यक्ति किसी स्थान से अलग होते हैं तो उस स्थान में पञ्चमी विभक्ति का प्रयोग होता है। जैसे— देवदत्तः 'प्रयागात् काशीं गच्छति' वाक्य में देवदत्त, प्रयाग से अलग हो रहा है। अतः प्रयाग में पञ्चमी हुई है। प्रयागात् के स्थान पर प्रयागतः (तसिल् प्रत्ययान्त) का भी प्रयोग हो सकता है।

यथा—

पञ्चमी पदानि	**तसिल् पदानि**	
ग्रामात्	ग्रामतः	ग्रामतः वनं दूरे नास्ति।
वृक्षात्	वृक्षतः	वृक्षतः पत्राणि पतन्ति।
वाराणस्याः	वाराणसीतः	वाराणसीतः प्रयागः पश्चिमे वर्तते।
नवदिल्ल्याः	नवदिल्लीतः	नवदिल्लीतः हरिद्वारनगरम् उत्तरे वर्तते।
तस्मात्	ततः	ततः आगच्छति।
एतस्मात्	इतः	इतः गच्छति।

© NCERT not to be republished

अभ्यासकार्यम्

प्र. 1. निम्नलिखितप्रयोगान् ध्यानेन पठित्वा स्थूलपदेषु प्रकृति-प्रत्ययानां विभागं कुरुत—

i) कालिदास: **कीर्तिमान्** आसीत्। ....
ii) एतौ बालकौ **बलवन्तौ** स्त:। ....
iii) एते जना: **गुणवन्त:** सन्ति। ....
iv) धनी सर्वत्र **समादरं** प्राप्नोति। ....
v) बलिनौ **अन्यायं** न सहत:। ....
vi) **गुणिन:** आत्मश्लाघां न कुर्वन्ति। ....
vii) पिता आकाशात् **श्रेष्ठतर:**। ....
viii) धरित्री मातु: अपि **गंभीरतरा।** ....
ix) कदलीफलम् आम्रात् **मधुरतमम्।** ....
x) हिमालय: भारतस्य **उच्चतम:** पर्वत: अस्ति। ....

प्र. 2. प्रत्ययं संयुज्य पदनिर्माणं कुरुत—

i) श्री + मतुप् ....
ii) शक्ति + वतुप् ....
iii) धन + वतुप् ....
iv) बल + वतुप् ....
v) गुरु + तल् ....
vi) सुन्दर + मयट् ....
vii) पटु + तमप् ....
viii) मृत् + मयट् ....
ix) वसुदेव + अण् ....
x) धर्म + ठक् ....
xi) मित्र + तल् ....
xii) विद्वस् + त्व ....

प्र. 3. कोष्ठके दत्तै: पदै: रिक्तस्थानानि पूरयत—

i) धर्मेन्द्र: बालाभ्याम् ....। (प्रशस्यतर:/ प्रशस्यतम:)
ii) ....राज्ञ: दशरथस्य राजगुरु: आसीत्। (वाशिष्ठ: / वशिष्ठ:)

© NCERT not to be republished

iii) बालिकासु माया .... (चतुरतरा / चतुरतमा)
iv) पाण्डवानाम् ....दर्शनीयम् आसीत्। (युद्धकौशलम्/युद्ध कुशलम्)
v) .... आभूषणम् बहुमूल्यं भवति। (स्वर्णमय: / स्वर्णमयम्)
vi) रावण: .... आसीत् । (दानव: / दनुज:)
vii) .... जन: औषधिं सेवते। (व्याधित: / व्याधि:)
viii) बालिकासु चंद्रकला .... वदति (मधुरतरम् / मधुरतमम्)
ix) बालकेषु विजयस्य टङ्कणगति: .... (तीव्रतरा / तीव्रतमा)

प्र. 4. विशेष्यविशेषणे परस्परं योजयत—

i) कीर्तिमान् — मञ्जूषा
ii) उत्तमम् — पुरुष:
iii) उच्चतम: — कार्यम्
iv) लौहमयी — पर्वत:

प्र. 5. उदाहरणमनुसृत्य प्रकृतिप्रत्ययविभागं कुरुत—

यथा— धीमान् = धी + मतुप्

i) मधुरतम: ....
ii) तीव्रतर: ....
iii) वासुदेव: ....
iv) कार्मिक: ....
v) दन्त्यम् ....
vi) मृण्मय: ....
vii) पिपासित: ....
viii) लघुता ....
ix) वीरतम: ....
x) नदीत: ....

प्र. 6. अधोलिखितेषु शब्देषु तसिल्प्रत्ययं संयुज्य वाक्यरचनां कुरुत—

पर्वत:, नगरम्, भूमि:, भानु:, नदी।

प्र. 7. कोष्ठकेषु प्रदत्तेषु शब्देषु तसिल्प्रत्ययं संयुज्य रिक्तस्थानानि पूरयत—

i) छात्र: .... आगच्छति । (विद्यालय)
ii) देवदत्त: .... काशीं गच्छति। (मथुरा)
iii) वयं .... जलम् आहराम:। (नदी)
iv) स: .... गत:। (देवालय)

© NCERT not to be republished

3. स्त्री प्रत्यय

पुँल्लिङ्ग शब्दों में जिन प्रत्ययों को लगाकर स्त्रीलिङ्ग या स्त्रीवाचक शब्द बनाए जाते हैं, उन्हें स्त्री प्रत्यय कहते हैं।

1. आ (टाप्, डाप्, चाप्)
2. ई (ङीप्, ङीष्, ङीन्)

आ (टाप्, डाप्, चाप्)

- अकारान्त पुँल्लिङ्ग शब्दों से स्त्रीलिङ्ग शब्द बनाने के लिए टाप् 'आ' प्रत्यय लगाया जाता है।

  उदाहरण—

अश्व + टाप् (आ)	=	अश्वा
सुत + टाप् (आ)	=	सुता
सरल + टाप् (आ)	=	सरला
प्रथम + टाप् (आ)	=	प्रथमा

- यदि पुँल्लिङ्ग शब्द के अन्त में 'अक' हो तो 'आ' प्रत्यय लगने पर 'इक' हो जाता है।

  उदाहरण—

बालक + आ	=	बालिका
मूषक + आ	=	मूषिका
शिक्षक + आ	=	शिक्षिका
साधक + आ	=	साधिका
गायक + आ	=	गायिका
नायक + आ	=	नायिका

ई (ङीप्, ङीष्, ङीन्)

- ऋकारान्त एवं नकारान्त पुँल्लिङ्ग शब्दों को स्त्रीलिङ्ग शब्द में बदलने के लिए 'ई' प्रत्यय लगाया जाता है।

  उदाहरण—

कर्तृ + ई	=	कर्त्री

© NCERT not to be republished

दातृ + ई	=	दात्री
धातृ + ई	=	धात्री
तपस्विन् + ई	=	तपस्विनी
गुणिन् + ई	=	गुणिनी

- अकारान्त पुँल्लिङ्ग शब्दों तथा कतिपय जातिवाचक शब्दों में भी 'ई' प्रत्यय लगाकर स्त्रीलिङ्ग शब्द बनाया जाता है।

उदाहरण—

नद + ई	=	नदी
देव + ई	=	देवी
भयङ्कर + ई	=	भयङ्करी
गोप + ई	=	गोपी
महिष + ई	=	महिषी
शूकर + ई	=	शूकरी
ब्राह्मण + ई	=	ब्राह्मणी
मृग + ई	=	मृगी

- द्विगु समास का अन्तिम शब्द यदि अकारान्त है तो 'ई' प्रत्यय लगता है।

उदाहरण—

त्रिलोक + ई	=	त्रिलोकी
पंचवट + ई	=	पंचवटी

- शतृ प्रत्ययान्त शब्दों को स्त्रीलिङ्ग में बदलने के लिए 'ई' प्रत्यय लगता है।

उदाहरण—

गच्छत् + ई	=	गच्छन्ती
वदत् + ई	=	वदन्ती
दर्शयत् + ई	=	दर्शयन्ती

- इसके अतिरिक्त भी 'ई' प्रत्यय के योग से स्त्रीलिङ्ग शब्द बनाए जाते हैं।

उदाहरण—

श्रीमत् + ई	=	श्रीमती

© NCERT not to be republished

भवत् + ई = भवती
गतवत् + ई = गतवती

- जाया अर्थ में पुँल्लिङ्ग शब्दों से (ङीष्) (ई) प्रत्यय लगाया जाता है।

उदाहरण—

इन्द्र + ङीष् = इन्द्राणी
वरुण + ङीष् = वरुणानी
भव + ङीष् = भवानी
मातुल + ङीष् = मातुलानी
रुद्र + ङीष् = रुद्राणी

- कुछ शब्दों से स्त्रीलिङ्ग शब्द बनाने के लिए 'आ' और 'ई' दोनों प्रत्यय लगाए जाते हैं।

उदाहरण—

आचार्य-आचार्या (जो स्वयं पढ़ाती है) आचार्याणी (आचार्य की पत्नी), उपाध्याय-उपाध्याया-उपाध्यायानी एवमेव क्षत्रिय-क्षत्रिया-क्षत्रियाणी

ति प्रत्यय

- युवन् शब्द से स्त्रीलिङ्ग बनाने के लिए 'ति' प्रत्यय लगाया जाता है।

युवन् + ति = युवति:

अभ्यासकार्यम्

प्र. 1. निर्देशानुसारं लिङ्गपरिवर्तनं कुरुत—

i) बालक .... (स्त्री.)
ii) आराध्या .... (पुं.)
iii) प्रथमा .... (पुं.)
iv) साधक .... (स्त्री.)
v) आचार्या .... (पुं.)
vi) धातृ .... (स्त्री.)

© NCERT not to be republished

नवम अध्याय

समास परिचय

'समसनम्' इति समास:। इस प्रकार 'समास' शब्द का अर्थ है— संक्षेपण। अर्थात् दो या दो से अधिक पदों में प्रयुक्त विभक्तियों, समुच्चय बोधक 'च' आदि को हटाकर एक पद बनाना। **यथा**— गायने कुशला = गायनकुशला। इसी तरह राज्ञ: पुरुष: = राजपुरुष: पदों में विभक्ति-लोप, सीता च रामश्च = सीतारामौ में समुच्चय बोधक 'च' का लोप हुआ है। इसी प्रकार विद्या एव धनं यस्य स: = विद्याधन: पद में कुछ पदों का लोप कर संक्षेपण क्रिया द्वारा गायनकुशला, राजपुरुष:, सीतारामौ तथा विद्याधन: पद बनाए गए हैं।

कहीं-कहीं पदों के बीच की विभक्ति का लोप नहीं भी होता है।

यथा— खेचर:, युधिष्ठिर:, वनेचर: आदि। ऐसे समासों को अलुक् समास कहते हैं। पदों की प्रधानता के आधार पर समास के मुख्यत: चार भेद होते हैं— (1) अव्ययीभाव (2) तत्पुरुष (3) द्वन्द्व तथा (4) बहुव्रीहि। तत्पुरुष के दो उपभेद भी हैं— कर्मधारय एवं द्विगु। इस प्रकार सामान्य रूप से समास के छ: भेद हैं।

1. अव्ययीभाव

इस समास में पहला पद अव्यय होने के साथ ही साथ प्रधान भी होता है। समास होने पर समस्त पद अव्यय बन जाता है तथा नपुंसकलिङ्ग में प्रयुक्त होता है, यथा—

यथाशक्ति	=	शक्तिम् अनतिक्रम्य
निर्विघ्नम्	=	विघ्नानाम् अभाव:
उपगङ्गम्	=	गङ्गाया: समीपम्
अनुरूपम्	=	रूपस्य योग्यम्

प्रत्येकम्	=	एकम् एकम् इति
प्रतिगृहम्	=	गृहं गृहम् इति
निर्मक्षिकम्	=	मक्षिकाणाम् अभाव:
उपनदम्	=	नद्या: समीपम्
प्रत्यक्षम्	=	अक्ष्णो: प्रति
परोक्षम्	=	अक्ष्णो: परम्

2. तत्पुरुष समास

इस समास में प्रायेण उत्तर पद की प्रधानता होती है। इसके दोनों पदों में अलग-अलग विभक्तियाँ होती हैं। कहीं-कहीं पर दोनों पदों में समान विभक्ति भी होती है। ऐसी स्थिति में पूर्वपद की विभक्ति का लोप करके समस्त पद बनाया जाता है। इसमें द्वितीया से सप्तमी तक की विभक्ति का लोप करके समस्त पद बनाया जाता है।

उदाहरण—

शरणम् आगत:	=	शरणागत:	द्वितीया तत्पुरुष
शरणं प्राप्त:	=	शरणप्राप्त:	
सुखं प्राप्त:	=	सुखप्राप्त:	
पित्रा युक्त	=	पितृयुक्त:	तृतीया तत्पुरुष
सर्पेण दष्ट:	=	सर्पदष्ट:	
शरेण विद्ध:	=	शरविद्ध:	
अग्निना दग्ध:	=	अग्निदग्ध:	
धनेन हीन:	=	धनहीन:	
विद्यया हीन:	=	विद्याहीन:	
भूताय बलि:	=	भूतबलि:	चतुर्थी तत्पुरुष
दानाय पात्रम्	=	दानपात्रम्	
यूपाय दारु	=	यूपदारु	
स्नानाय इदम्	=	स्नानार्थम्	
तस्मै इदम्	=	तदर्थम्	

© NCERT not to be republished

चौरात् भयम्	=	चौरभयम्	पञ्चमी तत्पुरुष
रोगात् मुक्त:	=	रोगमुक्त:	
अश्वात् पतित:	=	अश्वपतित:	
स्वर्गात् पतित:	=	स्वर्गपतित:	
सिंहात् भीत:	=	सिंहभीत:	
राज्ञ: पुरुष:	=	राजपुरुष:	षष्ठी तत्पुरुष
देवानां पति:	=	देवपति:	
नराणां पति:	=	नरपति:	
देवस्य पूजा	=	देवपूजा	
सुखस्य भोग:	=	सुखभोग:	
युद्धे निपुण:	=	युद्धनिपुण:	सप्तमी तत्पुरुष
कार्ये कुशल:	=	कार्यकुशल:	
शास्त्रे प्रवीण:	=	शास्त्रप्रवीण:	
जले मग्न:	=	जलमग्न:	
सभायां पण्डित:	=	सभापण्डित:	
न धार्मिक:	=	अधार्मिक:	नञ् तत्पुरुष
न सुखम्	=	असुखम्	
न आदि:	=	अनादि:	
न सत्यम्	=	असत्यम्	

तत्पुरुष समास के दो और भी भेद हैं— (i) समानाधिकरण तत्पुरुष अर्थात् कर्मधारय समास (ii) द्विगु समास।

i) कर्मधारय समास

इसके दोनों पदों में विभक्ति समान होती है। इसके तीन स्वरूप होते हैं—

(क) कभी-कभी विग्रह पदों में पूर्वपद विशेषण होता है तथा उत्तरपद विशेष्य होता है।

(ख) कभी-कभी पूर्वपद उपमान होता है और उत्तरपद उपमेय होता है।

© NCERT not to be republished

(ग) कभी-कभी दोनों पद विशेषण होते हैं।

उदाहरण—

विग्रह		समस्त पद	समास
नीलम् उत्पलम्	=	नीलोत्पलम्	कर्मधारय (विशेषण-विशेष्य)
विशाल: वृक्ष:	=	विशालवृक्ष:	
मधुरं फलम्	=	मधुरफलम्	
ज्येष्ठ: पुत्र:	=	ज्येष्ठपुत्र:	
कुत्सित: राजा	=	कुराजा	
सुन्दर: पुरुष:	=	सुपुरुष:	
महान् च असौ राजा	=	महाराज:	
घन इव श्याम:	=	घनश्याम:	कर्मधारय (उपमान-उपमेय)
कमलम् इव मुखम्	=	कमलमुखम्	
चन्द्र इव मुखम्	=	चन्द्रमुखम्	
नर: सिंह इव	=	नरसिंह:	
शीतं च उष्णम्	=	शीतोष्णम्	कर्मधारय (उभयपद-विशेषण)
रक्तश्च पीत:	=	रक्तपीत:	
आदौ सुप्त: पश्चादुत्थित:	=	सुप्तोत्थित:	

ii) द्विगु समास

जब कर्मधारय समास का पूर्वपद संख्यावाची हो तो उसे द्विगु समास कहते हैं।

यह समास सामान्यत: (समूह) अर्थ में होता है। इसके विग्रह में प्रायेण षष्ठी विभक्ति का प्रयोग किया जाता है। समस्त पद सामान्यतया नपुंसकलिङ्ग एक वचन में होता है।

उदाहरण—

सप्तानां दिनानां समाहार:	=	सप्तदिनम्
पञ्चानां पात्राणां समाहार:	=	पञ्चपात्रम्
त्रयाणां भुवनानां समाहार:	=	त्रिभुवनम्

© NCERT not to be republished

पञ्चानां रात्रीणां समाहार:	=	पञ्चरात्रम्
चतुर्णां युगानां समाहार:	=	चतुर्युगम्

- कभी-कभी द्विगु ईकारान्त स्त्रीलिङ्गी भी हो जाता है—

उदाहरण—

त्रयाणां लोकानां समाहार:	=	त्रिलोकी
पञ्चानां वटानां समाहार:	=	पञ्चवटी
सप्तानां शतानां समाहार:	=	सप्तशती
अष्टानां अध्यायानां समाहार:	=	अष्टाध्यायी

3. द्वन्द्व समास

जिस समस्त पद में दोनों पदों की प्रधानता होती है वहाँ द्वन्द्व समास होता है। इसके विग्रह में 'च' का प्रयोग होता है, जैसे— लवश्च कुशश्च = लवकुशौ। यहाँ जितनी प्रधानता 'लव' की है उतनी ही प्रधानता 'कुश' की भी है। द्वन्द्व समास के दो रूप माने गए हैं— (1) इतरेतर द्वन्द्व (2) समाहार द्वन्द्व

i) **इतरेतर द्वन्द्व**— जिस समस्त पद में दोनों पदों का अर्थ अलग-अलग होता है, उसे इतरेतर द्वन्द्व कहते हैं। समस्त पद में संख्या के अनुसार द्विवचन या बहुवचन होता है, किन्तु लिङ्ग परिवर्तन परवर्ती या उत्तरवर्ती पद के अनुसार होता है।

उदाहरण—

पार्वती च परमेश्वरश्च	=	पार्वतीपरमेश्वरौ
रामश्च कृष्णश्च	=	रामकृष्णौ
धर्मश्च अर्थश्च कामश्च मोक्षश्च	=	धर्मार्थकाममोक्षा:
सीता च रामश्च	=	सीतारामौ
पुत्रश्च कन्या च	=	पुत्रकन्ये
राधा च कृष्णश्च	=	राधाकृष्णौ
धनञ्च जनश्च यौवनञ्च	=	धनजनयौवनानि

© NCERT not to be republished

ii) समाहार द्वन्द्व— जहाँ अनेक वस्तुओं का संग्रह दिखाया जाता है अर्थात् समूह की प्रधानता रहती है, वहाँ समाहार द्वन्द्व समास होता है।

उदाहरण—

आहारश्च निद्रा च भयं च इति, एतेषां समाहार = आहारनिद्राभयम्

पाणी च पादौ च = पाणिपादम्

यवाश्च चणकाश्च = यवचणकम्

पुत्रश्च पौत्रश्च = पुत्रपौत्रम्

द्वन्द्व समास के सन्दर्भ में विशेष बातें—

- ह्रस्व इकारान्त तथा ह्रस्व उकारान्त पद को समस्त पद में पहले रखा जाता है।

  यथा— वायुश्च सूर्यश्च = वायुसूर्यौ
- द्वन्द्व में स्वरादि और ह्रस्व अकारान्त पद को पहले रखा जाता है।

  यथा— ईशश्च कृष्णश्च = ईशकृष्णौ।
- कम स्वर वर्णों वाले पद को पहले रखा जाता है।

  यथा— रामश्च केशवश्च = रामकेशवौ।
- ह्रस्व स्वर वाले पद को पहले रखते हैं।

  यथा— कुशश्च काशश्च = कुशकाशम्
- श्रेष्ठ या पूज्य पदों का प्रयोग पहले होता है।

यथा— माता च पिता च = मातापितरौ (पिता की अपेक्षा माता अधिक पूजनीय है)

4. बहुव्रीहि समास

जिस समास में पूर्व तथा उत्तर दोनों पद प्रधान न होकर किसी अन्य पद की प्रधानता होती है, उसे बहुव्रीहि समास कहते हैं।

विग्रह करते समय इसमें 'यस्य स:' आदि लगाया जाता है।

© NCERT not to be republished

उदाहरण—

महान्तौ बाहू यस्य सः	=	महाबाहुः (विष्णुः)
दश आननानि यस्य सः	=	दशाननः (रावणः)
पीतम् अम्बरम् यस्य सः	=	पीताम्बरः (कृष्णः)
चत्वारि मुखानि यस्य सः	=	चतुर्मुखः (ब्रह्मा)
चक्रं पाणौ यस्य सः	=	चक्रपाणिः (विष्णुः)
शूलं पाणौ यस्य सः	=	शूलपाणिः (शिवः)
चन्द्र इव मुखं यस्याः सा	=	चन्द्रमुखी (नारी)
पाषाणवत् हृदयं यस्य सः	=	पाषाणहृदयः (पुरुषः)
कमलम् इव नेत्रे यस्य सः	=	कमलनेत्रः (सुन्दर आँखों वाला)
चन्द्रः शेखरे यस्य सः	=	चन्द्रशेखरः (शिवः)

एकशेष

जहाँ अन्य पदों का लोप होकर एक ही पद शेष बचे, वहाँ एकशेष होता है। यह समास से भिन्न वृत्ति है।

उदाहरण— बालकश्च बालकश्च बालकश्च = बालकाः।

एकशेष में पुँल्लिङ्ग और स्त्रीलिङ्ग पदों में से पुँल्लिङ्ग पद ही शेष रहता है।

यथा— माता च पिता च = पितरौ

दुहिता च पुत्रश्च = पुत्रौ

© NCERT not to be republished

अभ्यासकार्यम्

प्र. 1. उदाहरणमनुसृत्य रिक्तस्थानानां पूर्ति: कोष्ठकात् समुचितै: समस्तपदै: कुरुत—

उदाहरण— तौ लवकुशौ वाल्मीके: आश्रमे पठत: । (लवकुशे/ लवकुशौ)

i) .... जन: नित्यकर्म कृत्वा प्रातराशं करोति। (विशालवृक्ष:/ सुप्तोत्थित:)

ii) त्रयाणां लोकानां समाहार: .... इति कथ्यते। (त्रिलोकी/ त्रिलोकम्)

iii) ऋषे: आश्रम: .... अस्ति। (प्रतिगृहम्/ उपगङ्गम्)

iv) तव .... मलिनम् अस्ति। (पाणिपादा:/ पाणिपादम्)

v) .... सैनिक: व्रणयुक्त: जात:। (स्वर्गपतित:/ अश्वपतित:)

vi) .... जीवनस्य उद्देश्या: सन्ति। (धर्मार्थकाममोक्षं/ धर्मार्थकाममोक्षा:)

प्र. 2. अधोलिखितवाक्येषु स्थूलपदानि आश्रित्य समस्तपदं विग्रहं वा लिखत—

यथा—	भिक्षुक: प्रत्येकं गृहं गच्छति।	एकम् एकम् इति
i)	शरणम् आगत: तु सदैव रक्षणीय:।	....
ii)	विद्यया हीन: छात्र: न शोभते।	....
iii)	असत्यं तु त्याज्यं भवति।	....
iv)	राम: महाराज: आसीत्।	....
v)	सीता च राम: च वनम् अगच्छताम्।	....
vi)	तडाग: नीलोत्पलै: सुशोभते।	....

प्र. 3. उदाहरणानि पठित्वा तदनुसारं विग्रहं समासनामानि च लिखत।

उदाहरण—

पाणी च पादौ च तेषां समाहार:— पाणिपादम् (समाहार द्वन्द्व)

माता च पिता च इति — मातापितरौ (इतरेतर द्वन्द्व)

माता च पिता च इति — पितरौ (एकशेष)

© NCERT not to be republished

i)	ब्राह्मणौ	....
ii)	सुखदु:खम्	....
iii)	शिरोग्रीवम्	....
iv)	रामलक्ष्मणभरता:	....
v)	अजौ	....
vi)	बालका:	....
vii)	शास्त्रप्रवीण:	....
viii)	नरसिंह:	....
ix)	प्रत्यक्षम्	....
x)	दशानन:	....

प्र. 4. अधोलिखितवाक्येषु समस्तपदं चित्वा तस्य विग्रहं लिखत—

	समस्तपदम्	**विग्रहम्**
i)	विष्णु: पीताम्बरं धारयति।	....
ii)	भवत: कार्यं निर्विघ्नं समापयेत्।	....
iii)	दुर्गासप्तशती पठितव्या।	....
iv)	शरविद्ध: हंस: भूमौ पतित:।	....
v)	वृद्ध: पुत्रपौत्रम् दृष्ट्वा प्रसीदति।	....
vi)	विष्णु: चक्रपाणि: कथ्यते।	....

© NCERT not to be republished

दशम अध्याय

कारक और विभक्ति

कारक

वाक्य में जिसके द्वारा क्रिया की सिद्धि हो, उसे कारक कहते हैं (क्रियाजनकत्वं कारकत्वम्)।

किसी वाक्य में क्रिया के सम्पादन में सहायता करने वाले को कारक कहते हैं (क्रियां करोति निर्वर्तयतीति कारकम्)।

हे बालका: ! नृपस्य पुत्र: ययाति: स्वभवने कोषात् स्वहस्तेन याचकेभ्य: धनं ददाति

1.	क: ददाति?	ययाति: (कर्ता)	प्रथमा विभक्ति
2.	किं ददाति?	धनं (कर्म)	द्वितीया विभक्ति
3.	केन ददाति?	हस्तेन (करण)	तृतीया विभक्ति
4.	केभ्य: ददाति?	याचकेभ्य: (सम्प्रदान)	चतुर्थी विभक्ति
5.	कस्मात् ददाति?	कोषात् (अपादान)	पञ्चमी विभक्ति
6.	कुत्र ददाति?	स्वभवने (अधिकरण)	सप्तमी विभक्ति

यहाँ नृपति: आदि पदों का क्रिया के साथ सम्बन्ध है। अत: ये कारक हैं। संस्कृत में सम्बन्ध तथा सम्बोधन को क्रिया से सीधे सम्बद्ध न होने के कारण कारक नहीं माना जाता है। इस वाक्य में नृपस्य पद का ययाति: (कर्ता से) सम्बन्ध है, किन्तु क्रिया ददाति से सीधा सम्बन्ध नहीं है। इसी तरह हे बालका:! का भी क्रिया से सीधा सम्बन्ध नहीं है।

- इस तरह कर्ता, कर्म, करण, सम्प्रदान, अपादान तथा अधिकरण— ये छ: कारक हैं।

1. **कर्ता**— क्रिया को स्वतन्त्र रूप से करने वाले को कर्ता कहते हैं।

यथा— **गिरीशः** पुस्तकं पठति। यहाँ 'पठति' क्रिया को करने वाला 'गिरीश' है। अतएव यह कर्ता कारक है।

2. **कर्म**— क्रिया के सम्पादन में कर्ता के सर्वाधिक अभीष्ट को कर्म कहते हैं।

यथा— गिरीश: **पुस्तकं** पठति। यहाँ पठन क्रिया के सम्पादन में कर्ता 'गिरीश' के लिए 'पुस्तक' सर्वाधिक अभीष्ट है, अत: कर्मकारक है।

3. **करण**— क्रिया की सिद्धि में कर्ता के प्रमुख सहायक को करण कहते हैं।

यथा— गौरी **जलेन** मुखं प्रक्षालयति। यहाँ 'प्रक्षालन' क्रिया का प्रमुख सहायक जल है। अत: 'जल' करण कारक है।

4. **सम्प्रदान कारक**— जिसे कुछ दिया जाता है या जिसके लिए कोई कार्य किया जाता है, वहाँ सम्प्रदान कारक होता है।

यथा— वागीश: मित्राय लेखनीं ददाति। इस वाक्य में मित्र को लेखनी दी जा रही है, अत: 'मित्राय' सम्प्रदान कारक है। इसी तरह 'माता बालकाय फलम् आनयति' वाक्य में फल लाने का कार्य बालक के लिए हो रहा है, अत: 'बालकाय' सम्प्रदान कारक है।

5. **अपादान कारक**— जिससे कोई वस्तु अलग होती है, वह अपादान कारक होता है। 'वृक्षात्' पत्राणि पतन्ति। यहाँ पत्ते (पत्राणि) वृक्ष से अलग हो रहे हैं, अत: 'वृक्षात्' अपादान कारक है।

6. **अधिकरण कारक**— क्रिया का आधार अधिकरण है।

यथा— मुनि: **आसने** तिष्ठति। इस वाक्य में तिष्ठति क्रिया का आधार 'आसने' है, अत: आसने अधिकरण कारक है।

7. **सम्बन्ध और सम्बोधन**— जहाँ एक व्यक्ति अथवा वस्तु का दूसरे व्यक्ति अथवा वस्तु से सम्बन्ध प्रकट हो, वहाँ षष्ठी विभक्ति का प्रयोग किया जाता है।

यथा— **रामस्य** पुत्र: कुश: गच्छति। यहाँ रामस्य पद में षष्ठी विभक्ति है

© NCERT not to be republished

जिसका पुत्र कुश से सीधा सम्बन्ध है। अत: 'रामस्य' में सम्बन्धवाचक षष्ठी है। सोहनस्य पुस्तकम् अस्ति। यहाँ सोहन का पुस्तक से सीधा सम्बन्ध है, अत: 'सोहनस्य' में सम्बन्ध कारक है।

जिसे पुकारा जाए या सम्बोधित किया जाए, उसे सम्बोधन कहते हैं। जैसे— हे बालक! कोलाहलं मा कुरु। इस वाक्य में 'बालक' को सम्बोधित किया गया है, अत: सम्बोधन है। क्रिया से सीधा सम्बन्ध न रखने के कारण सम्बन्ध तथा सम्बोधन को संस्कृत में कारक नहीं माना जाता है।

विभक्ति

शब्दों में लगने वाली विभक्तियाँ सात हैं। प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी तथा सप्तमी। इनके तीनों वचनों में अलग-अलग प्रत्यय लगते हैं। ये प्रत्यय 21 हैं, जिन्हें सुप् नाम से जाना जाता है। सुप् प्रत्ययों के लग जाने पर ही शब्द पद बनकर प्रयोग योग्य होते हैं तथा सुबन्त कहलाते हैं।

ये विभक्तियाँ दो तरह से प्रयोग की जाती हैं। कारक विभक्ति के रूप में तथा उपपद विभक्ति के रूप में।

- क्रिया के आधार पर (संज्ञादि शब्दों में) लगने वाली विभक्ति को कारक विभक्ति कहते हैं।
- अन्य पदों के आधार पर लगने वाली विभक्ति को उपपद विभक्ति कहते हैं।

प्रथमा विभक्ति (कर्ता)

- कर्तृवाच्य के कर्ता में और कर्मवाच्य के कर्म में प्रथमा विभक्ति लगती है।

यथा— मोहन: दुग्धं पिबति। यहाँ दूध पीने की क्रिया को करने वाला 'मोहन' है। अत: 'मोहन:' में प्रथमा विभक्ति है।

राम: पुस्तकं पठति। इस वाक्य में पुस्तक पठन की क्रिया को करने वाला **'राम'** है, जो प्रधान होने के कारण कर्ता है।

सोहनेन **ग्रन्थ:** पठ्यते। यह वाक्य कर्मवाच्य है, जिसमें कर्म (ग्रन्थ का पढ़ना) प्रधान है, अत: 'ग्रन्थ:' में प्रथमा विभक्ति हुई।

- किसी शब्द के अर्थ, लिङ्ग एवं परिमाण को प्रकट करने के लिए प्रथमा विभक्ति का प्रयोग होता है।

  यथा— मोहनः, पुरुषः, लघुः, लता
- इति के योग में प्रथमा विभक्ति होती है।

  यथा— वयम् इमं कालिदास इति नाम्ना जानीमः।

द्वितीया विभक्ति

- वाक्य में कर्ता के सर्वाधिक अभीष्ट अर्थात् कर्म में द्वितीया विभक्ति लगती है।

वैष्णवी **चित्रं** पश्यति, इस वाक्य में वैष्णवी को चित्र देखना सर्वाधिक अभीष्ट है, अतः चित्र 'कर्म' संज्ञा है और उस में द्वितीया विभक्ति है। इसी प्रकार बालः **मोदकं** वाञ्छति। यहाँ पर बालक को मोदक अभीष्ट है, अतः वह कर्मसंज्ञक है।

- कर्तृवाच्य के वाक्यों के कर्म में द्वितीया विभक्ति लगती है।

यथा— वैष्णवी **चित्रं** रचयति, यहाँ 'चित्र' की रचना करना ही कर्ता का कर्म है, अतः चित्र में द्वितीया विभक्ति है।

अभितः (सामने), परितः (चारो तरफ), समया (पास), निकषा (पास), हा (खेद), प्रति (के ओर), उभयतः (दोनों तरफ), सर्वतः (सर्वत्र), धिक् (धिक्), उपरि (ऊपर), अधः (नीचे), विना (बिना), अन्तरा (बिना), अन्तरेण (बिना) के योग में द्वितीया विभक्ति होती है।

i) ग्रामम् **अभितः** वृक्षाः सन्ति।
ii) नगरं **परितः** मार्गाः सन्ति।
iii) विद्यालयं **समया** उद्यानम् अस्ति।
iv) नदीं **निकषा** शीतलः समीरः वहति।
v) **हा!** बालघातिनम्।
vi) अहं मित्रं **प्रति** किमपि न कथयिष्यामि।
vii) मार्गम् **उभयतः** वृक्षाः सन्ति।
viii) आश्रमं **सर्वतः** वनानि सन्ति।
ix) **धिङ्** मूर्खम्।

© NCERT not to be republished

x) मम गृहम् **उपरि** वायुयानं गच्छति।

xi) भूमिम् **अध:** जन्तव: सन्ति।

xii) पुत्रं **विना** माता दु:खिता अभवत्।

xiii) परिश्रमम् **अन्तरा** सुखं नास्ति।

xiv) हास्यम् **अन्तरेण** जीवनं निरर्थकम्।

अधि उपसर्ग पूर्वक शीङ् स्था, आस्, वस् धातुओं के योग में द्वितीया विभक्ति होती है—

i) राजकुमार: **पर्यङ्कम्** अधिशेते।

ii) विष्णु: **वैकुण्ठम्** अधितिष्ठति।

iii) प्राचार्य: **उच्चासनम्** अध्यास्ते।

iv) मुनि: **वनम्** अधिवसति।

व्यवधान रहित कालवाची एवं मार्गवाची शब्दों के योग में द्वितीया विभक्ति होती है—

i) छात्र: **द्वादशवर्षाणि** अपठत्।

ii) छात्र: **मासं** पुस्तकम् अपठत्।

iii) मथुरानगरम् इत: **क्रोशं** वर्तते।

iv) विद्यालयात् **क्रोशद्वयं** पर्वत: वर्तते।

निम्नलिखित के योग में द्वितीया विभक्ति होती है—

सेव् (सेवा करना) — पुत्र: **पितरं** सेवते।

आ + रुह् (चढ़ना) — बालक: **वृक्षम्** आरोहति।

(अनु) (पीछे) — पुत्र: **पितरम्** अनुगच्छति।

निन्द् (निन्दा करना) — दुष्ट: **सज्जनं** निन्दति।

रक्ष् (रक्षा करना) — रक्षका: **ग्रामं** रक्षन्ति।

गम् (जाना) — बालिका: **नगरं** गच्छन्ति।

दुह् (दुहना) — राधा **गां** पय: दोग्धि।

याच् (मागना) — पुत्री **मातरं** धनं याचते।

पच् (पकाना) — स: **तण्डुलान्** ओदनं पचति।

दण्ड् (दण्ड देना)	—	राजा चौरं **शतं** दण्डयति।
प्रच्छ् (पूछना)	—	शिष्य: गुरुं **प्रश्नं** पृच्छति।
नी (ले जाना)	—	कृषक: **अजां ग्रामं** नयति।
चि (चुनना)	—	मालाकार: पादपं **पुष्पाणि** चिनोति।
ब्रू (बोलना)	—	गुरु: शिष्यं **धर्मं** ब्रूते (वदति)।
शास् (शिक्षा देना)	—	गुरु: **शिष्यं** शास्ति।
जि (जीतना)	—	पाण्डवा: **कौरवान्** अजयन्।
मथ् (मथना)	—	गोपी **दधि नवनीतं** मथ्नाति।
मुष् (चुराना)	—	चौर: **धनं** मुष्णाति।

दुह्, याच्, पच्, दण्ड्, रुध्, प्रच्छ्, चि, ब्रू, शास्, जि, मथ्, मुष्, नी, हृ, कृष्, वह् ये धातुएँ द्विकर्मक होती हैं। इनके दोनों ही कर्मों में द्वितीया विभक्ति होती है। उपर्युक्त उदाहरणों में अधिकांश में दो कर्मों का प्रयोग किया गया है। कुछ में (जि, शास्, मुष्) एक ही कर्म का प्रयोग किया गया है। पर यदि वहाँ दूसरे कर्म का प्रयोग होगा तो भी दोनों में द्वितीया विभक्ति ही लगेगी।

तृतीया विभक्ति

- जिसकी सहायता से कार्य किया जाता है उसमें तृतीया विभक्ति होती है। रचना कलमेन पत्रं लिखति। वाक्य में पत्र का लेखन कलम की सहायता से किया जा रहा है, अत: पत्र लेखन में सहायक होने के कारण 'कलम' में तृतीया विभक्ति है। राम: रावणं 'बाणेन' हतवान्। इस वाक्य में रावण को मारने में 'बाण' प्रमुख साधन है। अत: 'बाणेन' में तृतीया विभक्ति है।

- अधोलिखित शब्दों के योग में तृतीया विभक्ति होती है—

सह (साथ)	—	सोहन: **रामेण** सह गच्छति।
सार्धम् (साथ)	—	गोपाल: **रामपालेन** सार्धम् क्रीडति।
सदृशम् (समान)	—	सीताया: मुखं **चन्द्रेण** सदृशम् अस्ति।
समम् (साथ)	—	**भोजनेन समं** जलं पिब।

सम: (समान) — भोज: पराक्रमे **विक्रमेण सम:** आसीत्।

अलम् (बस) — **अलं विवादेन।**

विना (बिना) — **रामेण विना** सीता दु:खिता अभवत्।

- जिस अङ्ग में कोई विकार प्रदर्शित करना हो, उस अङ्गवाची शब्द में तृतीया विभक्ति होती है—

    i) देवदत्त: **नेत्रेण काण:** अस्ति।

    ii) अश्व: **पादेन खञ्ज:** अस्ति।

- फल प्राप्ति या कार्य की पूर्णता के अर्थ में समय की निरन्तरता का बोध कराने वाले शब्दों में तृतीया विभक्ति होती है—

    i) राम: **सप्ताहेन** पुस्तकं समाप्तवान्।

    ii) बाल: **सप्तभि: दिवसै:** नीरोग: जात:।

- पृथक्, विना तथा नाना के योग में द्वितीया, तृतीया या पञ्चमी विभक्तियों में से कोई भी एक लगती है—

    i) **जलं जलेन जलात्** वा विना न कोऽपि जीवितुं शक्नोति।

    ii) **ईश्वरम् ईश्वरेण ईश्वरात्** वा पृथक् न कोऽपि अस्मान् रक्षितुं समर्थ:।

    iii) **विद्यां विद्यया विद्याया:** वा नाना न सुखम्।

चतुर्थी विभक्ति

- सम्प्रदान कारक के योग में चतुर्थी विभक्ति होती है।
- 'दा' धातु के योग में जिसे दिया जा रहा है उसमें चतुर्थी विभक्ति होती है।

यथा— पिता **पुत्राय** पुस्तकं यच्छति।

राजा **भिक्षुकाय** वस्त्रं ददाति।

अधोलिखित शब्दों या धातुओं के योग में चतुर्थी विभक्ति होती है—

रुच् (अच्छा लगना) — बालकाय मोदकं रोचते।

क्रुध् (क्रोध करना) — स्वामी सेवकाय क्रुध्यति।

© NCERT not to be republished

कुप् (क्रोध करना) — माता पुत्राय कुप्यति।

द्रुह् (द्रोह करना) — मन्दमति: छात्र: योग्याय छात्राय द्रुह्यति।

स्पृह् (चाहना) — आभूषणेभ्य: स्पृहयति नारी।

ईर्ष्य् (ईर्ष्या करना) — दुर्योधन: अर्जुनाय ईर्ष्यति।

असूय् (निन्दा करना) — धनहीन: धनिकाय असूयति।

नम: (नमस्कार) — गुरवे नम:।

स्वस्ति (कल्याण हो) — स्वस्ति प्राणिभ्य:।

स्वधा (पितरों को जल देना) — पितृभ्य: स्वधा।

स्वाहा (समर्पित) — अग्नये स्वाहा।

नि + विद् (निवेदन करना) — स: गुरवे निवेदयति।

पञ्चमी विभक्ति

- अपादान कारक में पञ्चमी विभक्ति होती है।
- जिसे नियम पूर्वक पढ़ा जाए उसमें पञ्चमी विभक्ति होती है।

  यथा— अहं **गुरो:** संस्कृतं पठामि।
- जहाँ से कोई वस्तु उत्पन्न होती है उसमें पञ्चमी विभक्ति होती है।

  i) गङ्गा हिमालयात् प्रभवति।

  ii) बीजात् जायते वृक्ष:।
- जहाँ से कोई व्यक्ति या वस्तु अलग होती है वहाँ पञ्चमी विभक्ति होती है—

  i) मोहन: **विद्यालयात्** आगच्छति।

  ii) **वृक्षात्** पत्राणि पतन्ति।

भी, त्रा तथा त्रस् धातुओं के योग में (भय हेतु में) पञ्चमी विभक्ति होती है—

i) राम: **पापात्** बिभेति।

ii) रक्षक: **चौरात्** त्रायते।

iii) गोकुल: **दुर्जनात्** त्रस्त:।

निम्न अव्ययों के योग से पञ्चमी विभक्ति होती है—

ऋते (विना)	—	ईश्वरात् **ऋते** न कोऽपि मम रक्षक:।
प्रभृति (से लेकर, शुरू करके)	—	तत: **प्रभृति** स: नित्यं विद्यालयं गच्छति।
पृथक् (अलग)	—	ईश्वरात् **पृथक्** नास्ति कोऽपि रक्षक:।
दूरम् (दूर)	—	प्राथमिकविद्यालय: ग्रामात् **दूरम्** अस्ति।
बहि: (बाहर)	—	मूषक: बिलात् **बहि:** आगच्छत्।
आरभ्य (आरम्भ करके)	—	सोमवासरात् **आरभ्य** वृष्टि: जायते।
आरात् (निकट)	—	ग्रामात् **आरात्** नदी अस्ति।
अनन्तरम् (बाद)	—	त्वम् पठनात् **अनन्तरं** क्रीडाक्षेत्रं गच्छ।
प्रमाद (उपेक्षा, आलस्य)	—	पठनात् मा **प्रमाद:**।
अन्य (दूसरा)	—	ईश्वरात् **अन्य:** कोऽपि पालक: नास्ति ?
पूर्वं (पहले)	—	विद्यालयगमनात् **पूर्वं** गृहकार्यं कुरु।
बहि: (बाहर)	—	मूषक: बिलात् **बहि:** आगच्छत्।
प्राक्	—	सोमवासरात् **प्राक्** रविवासर: भवति।

षष्ठी विभक्ति

- सम्बन्ध में षष्ठी विभक्ति होती है

i) **रामस्य** पुस्तकम्

ii) **कृष्णस्य** ग्राम:

iii) **मृत्तिकाया:** घट:

निम्नलिखित शब्दों के योग में षष्ठी विभक्ति होती है—

कृते (लिए)	—	बालकस्य **कृते** जलम् आनय।
हेतु: (कारण)	—	कस्य **हेतो:** अयम् उत्सव: ?
समक्षम् (सामने)	—	गुरो: **समक्षम्** असत्यं मा वद।
मध्ये (बीच में)	—	हंसानां **मध्ये** बक: न शोभते।

© NCERT not to be republished

अन्त: (अन्दर) — अतिथि: गृहस्य **अन्त:** प्राविशत्।
दूरम् (दूर) — किं **दूरं** व्यवसायिनाम्।
अनादरम् (अनादर) — कस्यापि **अनादरम्** मा कुरु।

- कतिपय (तसिल्) तस् प्रत्ययान्त पदों के साथ षष्ठी होती है।

  यथा— ग्रामस्य पूर्वत: नदी वहति।

- अनेक में एक का निश्चय करने में षष्ठी एवं सप्तमी दोनों विभक्तियाँ होती हैं—

  i) सोहन: **वीराणां/वीरेषु** वा महावीर: अस्ति।
  ii) **कवीनां / कविषु** वा **कालिदास:** श्रेष्ठ:।

अध: (नीचे) — वृक्षस्य **अध:** श्रमिक: शेते।
उपरि (ऊपर) — भवनस्य **उपरि** पक्षिण: सन्ति।
पुर: / पुरस्तात् (सामने) — गृहस्य **पुर:**/ पुरस्तात् निम्बवृक्ष: अस्ति।

सप्तमी विभक्ति

अधिकरण कारक में सप्तमी विभक्ति होती है—

i) **वृक्षे** फलानि सन्ति।
ii) सिंह: **वने** वसति।

- जिसके समस्त अवयवों में कोई वस्तु व्याप्त हो वहाँ सप्तमी विभक्ति होती है—

  तिलेषु तैलं विद्यते।

- जो कर्ता की इच्छा में विद्यमान हो, वहाँ सप्तमी विभक्ति होती है—

  रामस्य **पठने** अनुराग: अस्ति।

- जहाँ एक क्रिया के अनन्तर दूसरी क्रिया का होना पाया जाए वहाँ सप्तमी विभक्ति होती है—

  i) **सूर्ये** अस्तं गते पक्षिण: नीडं गता:।
  ii) **रामे** वनं गते दशरथ: प्राणान् अत्यजत्।
  iii) **रुदति बालके** पिता कार्यालयं गत:।

© NCERT not to be republished

- समूह में किसी एक की श्रेष्ठता के निर्धारण में सप्तमी / षष्ठी दोनों विभक्तियों का प्रयोग होता है—

  i) **बालकेषु** बालकानां वा रमेश: श्रेष्ठ:।
  ii) **पक्षिषु** पक्षिणां वा काक: चतुर:।
  iii) **वीरेषु** वीराणां वा राणाप्रताप: श्रेष्ठ:।
  iv) **पशुषु** पशूनां वा सिंहो राजा भवति।
  v) **धावत्सु** धावतां वा कपिल: श्रेष्ठ:।

- निमित्त (कारण) अर्थ में सप्तमी विभक्ति होती है—

  चर्मणि मृगं हन्ति—

- प्रवीण: (कुशल), चतुर शब्दों के प्रयोग में सप्तमी विभिक्त होती है—

  प्रवीण: (कुशल) — **वीणायां** प्रवीण:।
  चतुर: (चतुर) — रमा **वार्तालापे** चतुरा।

© NCERT not to be republished

अभ्यासकार्यम्

प्र. 1. कोष्ठकेषु मूलशब्दा: प्रदत्ता:। तेषु उचितविभक्ती: योजयित्वा रिक्तस्थानानानि पूरयत—

i) बालका: .... पृच्छन्ति। (अम्बा)
ii) नास्ति .... सम: शत्रु:। (क्रोध)
iii) .... भीत: बालक: क्रन्दति। (चौर)
iv) शिष्या: .... विद्यां गृह्णन्ति। (गुरु)
v) अहं .... प्राक् आगमिष्यामि। (अध्यापक)
vi) अस्माकम् बालिका: .... कुशला: सन्ति। (गायन)
vii) माता .... स्निह्यति। (शिशु)
viii) .... क्रोध: जायते। (काम)
ix) .... नम:। (सरस्वती)
x) अलम् .... । (विवाद)
xi) भिक्षुक: .... याचते। (भिक्षा)
xii) धिक् देशस्य .... । (शत्रु)
xiii) वीर: .... न विरमति। (धर्मयुद्ध)
xiv) दुर्योधन: .... जुगुप्सति स्म। (पाण्डव)
xv) .... अर्जुन: श्रेष्ठ: धनुर्धर:। (भ्रातृ)
xvi) पितरौ .... सर्वस्वं यच्छत:। (अस्मद्)
xvii) किम् .... एतत् गीतं रोचते ? (युष्मद्)
xviii) .... परित: वायुमण्डलम् अस्ति। (पृथ्वी)
xix) .... बहि: छात्रा: कोलाहलं कुर्वन्ति? (कक्षा)
xx) अहम् .... पूर्वं .... वन्दे। (शयन, ईश्वर)
xxi) परिश्रमिण: .... स्पृहयन्ति। (सफलता)
xxii) वाल्मीकि: .... रचयिता ? (रामायणम्)
xxiii) .... विभाति सर:। (पंकज)

प्र. 2. कोष्ठकेभ्य: शुद्धम् उत्तरं चित्वा रिक्तस्थानपूर्तिं कुरुत—

i) .... सह सीता वनम् अगच्छत्। (रामस्य/रामेण)

ii) माता .... स्निह्यति। (माम्/मयि)

iii) .... मोदकं रोचते। (मोहनम्/मोहनाय)

iv) स: .... धनं ददाति। (रमेशम्/रमेशाय)

v) .... पत्राणि पतन्ति। (वृक्षेण/वृक्षात्)

vi) अध्यापिका .... पुस्तकं यच्छति। (सुलेखाम्/सुलेखायै)

vii) .... परित: वृक्षा: सन्ति। (विद्यालयम्/विद्यालयस्य)

viii) .... नम:। (गुरवे/गुरुम्)

प्र. 3. उचितविभक्तिप्रयोगं कृत्वा अधोलिखितपदानां सहायतया वाक्यरचनां कुरुत—

i)	समम्	ii)	धिक्
iii)	उभयत:	iv)	विना
v)	अन्ध:	vi)	बहि:
vii)	प्रवीण:	viii)	अलम्
ix)	विभेति	x)	श्रेष्ठ:

प्र. 4. 'क' स्तम्भे शब्दा: दत्ता: सन्ति, 'ख' स्तम्भे च विभक्तय:। कस्य योगे का विभक्ति: प्रयुज्यते इति योजयित्वा लिखत—

	'क'	**'ख'**
i)	'रुच्' धातु योगे	(क) तृतीया
ii)	'सह' शब्द योगे	(ख) चतुर्थी
iii)	'नम:' शब्द योगे	(ग) पञ्चमी
iv)	'भी' 'त्रा' धातु योगे	(घ) चतुर्थी
v)	'दा' धातु योगे	(ङ) प्रथमा
vi)	कर्तृवाच्यस्य कर्तरि	(च) तृतीया
vii)	कर्मवाच्यस्य कर्तरि	(छ) चतुर्थी
viii)	'विना' योगे	(ज) तृतीया
ix)	यस्मिन् अङ्गे विकार: भवति तस्मिन्	(झ) द्वितीया, तृतीया, पञ्चमी
x)	कर्मवाच्यस्य कर्मणि	(ञ) प्रथमा

© NCERT not to be republished

प्र. 5. 'स्थूलपदानां' स्थाने शुद्धपदं लिखत—

i) **अध्यापिकाया:** परित: छात्रा: सन्ति। ....

ii) छात्र: **आचार्याय** प्रश्नम् पृच्छति। ....

iii) सीता **लेखन्या:** लेखं लिखति। ....

iv) गोपाल: **शिवस्य** सह वार्तां करोति। ....

v) चौरा: **आरक्षिणा** बिभ्यति। ....

vi) **महापुरुषम्** नम:। ....

vii) **त्वाम्** किम् रोचते? ....

viii) **कवये** कालिदास: श्रेष्ठ:। ....

ix) सा **गृहकर्मण:** निपुण:। ....

x) अहम् **रेलयानात्** कालिकातां गमिष्यामि। ....

© NCERT not to be republished

एकादश अध्याय

वाच्य परिवर्तन

अभिव्यक्ति या कथन के प्रकटीकरण की विधा को वाच्य कहते हैं। संस्कृत में वाच्य तीन तरह के होते हैं —

1. कर्तृवाच्य

इस वाच्य में कर्ता प्रधान होता है तथा क्रिया कर्ता के अनुसार प्रयुक्त होती है। इसके कर्ता में प्रथमा विभक्ति तथा कर्म में द्वितीया विभक्ति का प्रयोग होता है।

यथा— रामः गृहं गच्छति।

इस वाक्य में 'राम' कर्ता और 'गृहम्' कर्म है। इसकी क्रिया 'गच्छति' कर्ता 'राम' के अनुसार एकवचन की है।

बालिका पाठम् पठितवती।

इस वाक्य में 'बालिका' कर्ता तथा 'पाठम्' कर्म तथा 'पठितवती' क्रिया है।

सैनिकः देशं रक्षति।

इस वाक्य में 'सैनिकः' कर्ता, 'देशम्' कर्म तथा 'रक्षति' क्रिया है।

2. कर्मवाच्य

कर्मवाच्य में कर्म की प्रधानता होती है, अतः कर्म में प्रथमा तथा कर्ता में तृतीया विभक्ति का प्रयोग होता है। यहाँ क्रिया का प्रयोग कर्म के अनुसार होता है। जिस लिङ्ग, पुरुष तथा वचन में कर्म होता है, उसी लिङ्ग, पुरुष तथा वचन में क्रिया का प्रयोग होता है।

यथा— रामेण गृहं गम्यते।
विद्यार्थिना पाठः पठ्यते।
मया चित्रे दृश्येते।

इन वाक्यों में क्रमश: गृहम्, पाठ: तथा चित्रे कर्म हैं। अत: प्रथम दो वाक्यों में कर्म के एकवचन के अनुसार क्रिया भी एकवचन में तथा तीसरे में चित्रे में द्विवचन के कारण क्रिया भी द्विवचन में प्रयुक्त है।

3. भाववाच्य

भाववाच्य के कर्ता में तृतीया विभक्ति का प्रयोग होता है। भाववाच्य में क्रिया का अर्थ या भाव ही प्रधान होता है, क्रिया प्रथम पुरुष एकवचन में ही प्रयुक्त होती है। भले ही कर्ता एकवचन में हो या बहुवचन में।

यथा— (मया / त्वया / युवाभ्याम् / आवाभ्यां / अस्माभि: / तै:) सुप्यते / आस्यते।

वाच्य परिवर्तन के नियम— कर्तृवाच्य में वर्तमानकाल की क्रियाओं को यदि कर्मवाच्य में परिवर्तित किया जाता है तो क्रियाओं में इस प्रकार परिवर्तन होता है।

उदाहरण—

कर्तृवाच्य की क्रिया	—	कर्मवाच्य / भाववाच्य की क्रिया
पठति	—	पठ्यते
लिखति	—	लिख्यते
खादति	—	खाद्यते
भवति	—	भूयते
धावति	—	धाव्यते
हसति	—	हस्यते
करोति	—	क्रियते
क्रीणाति	—	क्रीयते
नयति	—	नीयते
गच्छति	—	गम्यते
उत्पतति	—	उत्पत्यते
रोदिति	—	रुद्यते

© NCERT not to be republished

भूतकाल की क्रियाओं में कर्तृवाच्य में जहाँ 'क्तवतु' प्रत्यय का प्रयोग होता है, वहाँ कर्मवाच्य में 'क्त' प्रत्यय का प्रयोग होता है— साथ ही साथ कर्ता में तृतीया विभक्ति होती है।

यथा— स: फलानि खादितवान्। (कर्तृवाच्य)

तेन फलानि खादितानि। (कर्मवाच्य)

अहम् ग्रन्थान् पठितवान्। (कर्तृवाच्य)

मया ग्रन्था: पठिता:। (कर्मवाच्य)

वयम् गुरुम् पूजितवन्त:। (कर्तृवाच्य)

अस्माभि: गुरु: पूजित:। (कर्मवाच्य)

© NCERT not to be republished

अभ्यासकार्यम्

प्र. 1. उदाहरणमनुसृत्य यथानिर्दिष्टं वाच्यपरिवर्तनं कुरुत—

यथा— राम: गृहं गच्छति। (कर्तृवाच्य)
रामेण गृहं गम्यते।
कमलया पायसम् पक्वम्। (कर्मवाच्य)
कमला पायसम् पक्ववती।
छात्रा: हसन्ति। (भाववाच्य)
छात्रै: हस्यते।

i) अहं कार्यं कृतवान्। (कर्मवाच्य)
ii) त्वम् पुस्तकम् पठितवान्। (कर्मवाच्य)
iii) स: गायति। (भाववाच्य)
iv) युवाभ्यां सुलेख: लिखित:। (कर्तृवाच्य)
v) ता: रुदन्ति। (भाववाच्य)
vi) मोहन: कन्दुकम् क्रीडति। (कर्तृवाच्य)
vii) छात्रै: दुग्धं पीतम्। (कर्तृवाच्य)
viii) छात्र: हसति। (भाववाच्य)
ix) मम भ्राता उद्याने भ्रमति। (भाववाच्य)
x) सैनिक: युद्धक्षेत्रं गच्छति। (कर्मवाच्य)

प्र. 2. अधोलिखितवाक्येषु कर्तृपदे वाच्यानुसारं रिक्तस्थानानि पूरयत—

यथा— **राजेन्द्र :** पाटलिपुत्रं गच्छति।
राजेन्द्रेण पाटलिपुत्रं गम्यते।

	कर्तृवाच्य	कर्मवाच्य
i)	.... रोटिकां खादति।	तेन रोटिका खाद्यते।
ii)	छात्र: ग्रन्थं पठति।	.... ग्रन्थ: पठ्यते।
iii)	.... राजभवनं गच्छति।	शकुन्तलया राजभवनं गम्यते।
iv)	दुष्यन्त: आखेटं करोति।	.... आखेट: क्रियते।
v)	.... गीतं गायति।	गायकेन गीतं गीयते।

© NCERT not to be republished

प्र. 3. अधोलिखितवाक्यानां कर्मपदे परिवर्तनं कुरुत—

	कर्तृवाच्य	कर्मवाच्य
i)	अहं .... पूजयामि।	मया **देव:** पूज्यते।
ii)	बालक: **फलं** खादितवान्।	बालकेन .... खादितम्।
iii)	त्वं **गृहं** गच्छसि।	त्वया .... गम्यते।
iv)	स: .... कथितवान्।	तेन **साधु:** कथित:।
v)	यूयं **कथां** श्रुतवन्त:।	युष्माभि: .... श्रुता।

प्र. 4. अधोलिखितवाक्यानां क्रियापदे परिवर्तनं कुरुत—

	कर्तृवाच्य	कर्मवाच्य
i)	स: जलम् **पिबति।**	तेन जलम् ....।
ii)	कपोत: आकाशे ....।	कपोतेन आकाशे **उत्पत्यते।**
iii)	सुनीता आभूषणं **धारयति।**	सुनीतया आभूषणं ....।
iv)	नेता भाषणं **करोति।**	नेत्रा भाषणं ....।
v)	स: कथां ....।	तेन कथा **श्रुता।**
vi)	श्रमिक: कार्यं **कृतवान्।**	श्रमिकेण कार्यं ....।
vii)	पुत्र: मातरं ....।	पुत्रेण माता **पूजिता**
viii)	त्वम् आचार्यम् **आदृतवान्।**	त्वया आचार्य: ....।

प्र. 5. अधोलिखितानां कथनानाम् उत्तरे त्रय: विकल्पा: दत्ता:। शुद्धविकल्पस्य समक्षे (✓) इति कुरुत—

(क) कर्तृवाच्यस्य कर्तरि विभक्ति: भवति—

i) प्रथमा ( ) (ii) द्वितीया ( ) (iii) तृतीया ( )

(ख) कर्तृवाच्यस्य कर्मणि विभक्ति: भवति—

i) प्रथमा ( ) (ii) द्वितीया ( ) (iii) तृतीया ( )

(ग) कर्मवाच्यस्य कर्तरि विभक्ति: भवति—

i) प्रथमा ( ) (ii) द्वितीया ( ) (iii) तृतीया ( )

(घ) कर्मवाच्यस्य कर्मणि विभक्ति: भवति—

i) प्रथमा ( ) (ii) द्वितीया ( ) (iii) तृतीया ( )

(ङ) भाववाच्यस्य कर्तरि विभक्ति: भवति—

i) प्रथमा ( ) (ii) द्वितीया ( ) (iii) तृतीया ( )

© NCERT not to be republished

द्वादश अध्याय

रचना प्रयोग

1. पत्रम्

i) रुग्णतायाः कारणात् अवकाशप्राप्तये प्रधानाचार्यं प्रति पत्रम्—

सेवायाम्

प्रधानाचार्य-महोदयाः

केन्द्रीय-विद्यालयः

आर. के. पुरम्, सैक्टरः-द्वितीयः

नवदेहली - 110022

विषयः— अवकाशप्राप्तये निवेदनम्

मान्यवराः / महोदयाः,

सविनयं निवेदनमस्ति यत् अहं शिरोवेदनया पीडितः अस्मि। एतस्मात्कारणात् अद्य विद्यालयम् आगन्तुमसमर्थः अस्मि। अतः प्रार्थये यत् दिनद्वयस्य अवकाशं प्रदाय अनुग्रहं कुर्वन्तु भवन्तः।

धन्यवादाः

भवतां विनीतः शिष्यः

नरेन्द्रः

कक्षा 10

वर्गः 'ब'

दिनाङ्क : ....

© NCERT not to be republished

ii) शुल्कक्षमापनार्थं प्रधानाचार्यं प्रति पत्रम्—

सेवायाम्

प्रधानाचार्य-महोदया:
केन्द्रीय-विद्यालय:
आर. के. पुरम्, सैक्टर: चतुर्थ:
नवदेहली - 110022

विषय:— शुल्कक्षमापनार्थं निवेदनम्

मान्यवरा: / महोदया:,

सविनयं निवेदनमस्ति यत् अहं भवत: विद्यालये दशमकक्षाया: 'स' वर्गस्य छात्र: अस्मि। मम पिता एकस्मिन् विद्यालये द्वारपाल: अस्ति। तस्य मासिकवेतनम् द्विसहस्ररूप्यकमात्रम् अस्ति। अस्माकं कुटुम्बे पञ्च सदस्या: सन्ति। अनेन वेतनेन कुटुम्बस्य निर्वाह: काठिन्येन भवति। अत: शुल्कक्षमापनार्थं प्रार्थये।

आशासे यत् मदीयाम् इमां प्रार्थनां स्वीकृत्य शुल्कक्षमापनद्वारा माम् उपकरिष्यन्ति श्रीमन्त:।

धन्यवादा:।

भवतां विनीत: शिष्य:
सुरेन्द्र:
कक्षा 10
वर्ग: 'ब'

दिनाङ्क: ....

© NCERT not to be republished

iii) पुस्तकानि प्रेषयितुं प्रकाशकं प्रति पत्रम्—

सेवायाम्

व्यवस्थापक-महोदया:

आर्य बुक डिपो

करोलबाग

नवदेहली

महोदय: / महोदया:,

सेवायाम् निवेदनमस्ति यत् अहम् अधोलिखितानि पुस्तकानि क्रेतुम् इच्छामि। अत: यत् समुचितमुन्मोकं (कमीशनं) निष्कास्य एतानि पुस्तकानि वी.पी. माध्यमेन प्रेषयन्तु भवन्त:। शीघ्रता प्रशंसनीया स्यात्।

	पुस्तकानां नामानि	लेखकानां नामानि	प्रति
1.	सरल संस्कृत व्याकरणम्	डॉ. परमानंदगुप्त:	1
2.	निबन्धसौरभम्	डॉ. अरुणेशकुमार:	1
3.	कथासागर:	डॉ. वागीश:	1

धन्यवादा:

भावत्क:

अशोक:

61/जवाहरनगरम्

मण्डी

हिमाचल प्रदेश

दिनाङ्क: ....

© NCERT not to be republished

iv) स्वभगिन्या: विवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रम्—

आर 688
न्यू राजेन्द्र नगरम्
दिल्लीत:
20.11.2012

प्रिय मित्र,

नमस्ते।

इदं ज्ञात्वा प्रसन्नो भविष्यसि यत् भगवत्कृपया मम भगिन्या: लताया: विवाहसंस्कार: अधोलिखितकार्यक्रमानुसारं सम्पत्स्यते। एतदर्थं सानुरोधं निमन्त्रयामि। आशासे यत् यथासमयं आगत्य अस्मान् प्रीणयिष्यसि।

कार्यक्रम:

मंगलवासरे	26.11.2012	प्रात: सप्तवादने यज्ञ: सायम् अष्टवादने वरयात्रीणां स्वागतम् प्रीतिभोजनम् च।
बुधवासरे	27.11.2012	प्रात: पञ्चवादने लताया: पतिगृहगमनम्।

स्वगृहे सर्वेभ्य: मम वन्दनं निवेदय।

दर्शनाभिलाषी
देवेन्द्र:

दिनाङ्क: ....

© NCERT not to be republished

v) पितरौ प्रति परीक्षाया: परिणामसूचकं पत्रम्—

छात्रावास:
केन्द्रीय-विद्यालय:
देहलीछावनीत:
नवदेहली

वन्दनीया: पितृचरणा:

सादरं प्रणम्यते यदहम् अत्र सम्यक् निवसामि। मम परीक्षाफलम् अधुना प्रकाशितम्। नवमकक्षायाम् अहम् प्रथमश्रेण्याम् उत्तीर्ण:। सर्वेषु छात्रेषु मम प्रथमं स्थानमस्ति। अधुना कानिचित् पुस्तकानि क्रेतव्यानि सन्ति। विद्यालयस्य शुल्कमपि देयमस्ति। अत: पञ्चसहस्रं रूप्यकाणि शीघ्रतया प्रेषयन्तु भवन्त:। अहं प्रत्यहं मातु: स्मरणं करोमि। अनुज: रमेश: कथम् अस्ति। भगिनी श्वेता प्रत्यहं पठनाय विद्यालयं गच्छति न वा। अहम् अवकाशे गृहम् आगमिष्यामि।

भवदाशीर्वचसां प्रतीक्षायाम् भवत्पुत्र:
भवभूति:
कक्षा 10
वर्ग: 'ब'
केन्द्रीय-विद्यालय:, दिल्ली

दिनाङ्क: ....

2. दूरभाषवार्ता

(दूरभाषयन्त्रे ध्वनि: भवति)

पिता — (यन्त्रमुत्थाप्य) क: वदति ?

रमेश: — पित:! अहम् रमेश:! प्रणमामि।

पिता — चिरञ्जीव वत्स! अपि कुशली ?

रमेश: — आम् पित:! भवताम् आशीर्वचोभि: सर्वं कुशलम् अस्ति। एक: आवश्यक: प्रसङ्ग: समुपस्थित:। तदर्थम् अहम् भवन्तम् आकारितवान्।

पिता — वत्स! कथय कीदृशं ते प्रयोजनम् ?
रमेश: — मम विद्यालयेन छात्राणाम् आगरानगरस्य दर्शनाय एका आमोदयात्रा आयोज्यते। इयं यात्रा दिनद्वयाय भविष्यति। एतदर्थं कक्षाया: गुरुभ्य: एकसहस्रुप्यकाणि देयानि सन्ति। कृपया एकसहस्ररुप्यकाणि शीघ्रं प्रेषयन्तु।
पिता — पुत्र! अहमद्यैव वित्तकोषं गत्वा एन.ई.एफ.टी द्वारा रुप्यकाणि प्रेषयिष्यामि। त्वया आमोदयात्रात: प्रत्यागत्य सूचना प्रेष्या।
रमेश: — अहम् आगरात: प्रत्यागत्य अवश्यमेवं सूचयिष्यामि। अधुना ध्वनियन्त्रं निदधानि।
पिता — आम् निधेहि ध्वनियन्त्रम्।
रमेश: — (पितरं प्रणम्य ध्वनियन्त्रम् आधारयन्त्रे निदधाति)

3. अपठित गद्यांश

1. उत्साह: उदासीनता, निराशा चेति तिस्र: मनस: अवस्था:। शिशव: सदा उत्साहशीला: इति विदितमेव। युवान: अपि प्रायेण उत्साहशीला:। अनेके वृद्धा: अपि तथैव। वयस: उत्साहस्य च नास्ति सम्बन्ध:। उत्साह: मानवस्य सहज: स्वभाव:। स: मनस: शरीरस्य च विकासाय भवति। शिशु: उत्साहेन सर्वं ग्रहीतुं, सर्वै: सह खादितुं सर्वै: सह खेलितुं च प्रवर्तते। प्रतिबन्धे कृते रोदिति। उपहासे कृते क्रोधं प्रकटयति किन्तु निराशो न भवति।

उपरिलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरत—

i) शिशु: उपहासे कृते किं करोति? 1

ii) मनस: कति अवस्था: सन्ति? 1

II. पूर्णवाक्येन उत्तरत—

i) के के उत्साहशीला: भवन्ति? 2

III. यथानिर्देशम् उत्तरत— ½×2 = 1

i) 'अनेके वृद्धा:' अत्र विशेषणपदम् किम्?

ii) 'ज्ञातमेव' इति अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

2. कस्मिंश्चित् प्रदेशे काचित् नदी प्रवहति स्म। नदीतीरे कश्चन संन्यासी स्वशिष्यै: सह आश्रमं निर्माय वसति स्म। एकदा संन्यासी शिष्यै: सह नद्या: अपरं तीरं गन्तुम् एकां नौकाम् आरूढवान्। वेगेन प्रवहन्त्यां नद्याम् अकस्मात् एका अपरा नौका शिलाया: घट्टनेन निमग्ना अभवत्। तेन तस्यां नौकायां स्थिता: सर्वे जना: मरणं प्राप्तवन्त:। संन्यासी अकथयत्- तस्यां नौकायां स्थितेषु कश्चित् दुष्ट: आसीत् इति मन्ये। अत: ते सर्वे मरणं प्राप्तवन्त:।

उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरत—

i) संन्यासी कुत्र वसति स्म? 1

ii) अपरा नौका कस्या: घट्टनेन नद्यां निमग्ना अभवत्? 1

II. पूर्णवाक्येन उत्तरत—

i) संन्यासी नौकादुर्घटनाया: किं कारणं कथितवान्? 2

III. यथानिर्देशम् उत्तरत— ½×2 = 1

i) 'सज्जन:' इति पदस्य विपरीतार्थकपदम् अनुच्छेदात् चित्वा लिखत।

ii) 'आरूढवान्' इति क्रियाया: कर्तृपदम् अनुच्छेदात् चित्वा लिखत।

3. प्रात:कालादारभ्य सायं पर्यन्तं मानव: अनेकानि कार्याणि करोति। एतेषु कार्येषु किं समीचीनं किं वा असमीचीनम् इति विषये शयनकाले अवश्यं चिन्तनीयम्। एतादृशेन आत्मावलोकनेन स्वकीये आचरणे अज्ञानेन अनवधानेन रागद्वेषाभ्यां वा यदि कश्चन प्रमाद: सञ्जात:, अपचार: द्रोहो वा निष्पन्न: तर्हि तेषां परिमार्जनोपाय: अवश्यम् आलोचनीय:। पश्चात्ताप: अनुभवितव्य:। श्व: प्रभृति एतादृशं प्रमादं न करिष्यामि इति दृढसङ्कल्प: करणीय:।

उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरत— 2

i) किं समीचीनम् किं वा असमीचीनम् इति विषये कदा आलोचनीयम्?

ii) यदि अपचार: द्रोह: वा निष्पन्न: तदा क: अवश्यम् आलोचनीय:?

II. पूर्णवाक्येन उत्तरत—

i) क: दृढसङ्कल्प: करणीय:? 2

III. यथानिर्देशम् उत्तरत—

i) अनुच्छेदे के पदे परस्परं विपरीतार्थे प्रयुक्ते? 1

4. य: स्वदोषाणां कृते अनुतपति तस्य सत्पथगमनस्य द्वारम् उद्घाटितं भवति। अनुतापानलेन पापानि भस्मीभवन्ति, ग्लानि: नश्यति, चित्तं निर्मलं प्रसन्नं च भवति, सद्विचार: समुदेति। इत्थम् आत्मानुशीलनस्य महत्त्वं जीवने अनुभूयते। तेन कृतेषु कार्येषु त्रुटय: न भवन्ति। अत: कृतदोषोऽपि जन: अनुतप्य सत्कर्मसम्पादनेन जीवने महान् भवितुम् अर्हति।

उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरत—

i) जीवने कस्य महत्त्वम् अनुभूयते? 1

ii) कृतदोष: जन: केन महान् भवितुं शक्नोति? 1

II. पूर्णवाक्येन उत्तरत—

i) अनुतापानलेन किं किं भवति? 2

III. यथानिर्देशम् उत्तरत— ½×2 = 1

i) 'एवम्' इति अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

ii) 'अनुभूयते' इति क्रियापदस्य कर्तृपदं किम्?

5. कस्मिंश्चित् अरण्ये अनेके पशव: वसन्ति स्म। एकदा पशूनां राजा सिंह: रोगपीडित: अभवत्। एकं शृगालं विहाय सर्वे पशव: रोगपीडितं नृपं द्रष्टुमागता:। एक: उष्ट्र: नृपाय एतत् न्यवेदयत् यत् अहंकारिणं शृगालं

© NCERT not to be republished

विहाय सर्वे भवन्तं द्रष्टुमागता:। एतच्छ्रुत्वा सिंह: क्रोधितोऽभवत्। स्वमित्रै: एतज्ज्ञात्वा शृगाल: शीघ्रमेव सिंहस्य समीपे प्राप्त:। क्रोधितेन सिंहेन विलम्बेन आगमनकारणं पृष्ट: शृगालोऽवदत् यदहं तु सर्वप्रथममागन्तुम् ऐच्छम् परं चिकित्सकात् औषधमपि आनेयमिति विचिन्त्य तत्रागच्छम्। तच्छ्रुत्वा प्रसन्न: सिंह: औषधविषये पृष्टवान्। शृगाल: अवदत् यत्तेन औषधं तु न दत्तं परं कृपापरो भूत्वा चिकित्साक्रमम् उक्तम् यत् उष्ट्रस्य रक्तपानेनैव रोगस्य शान्ति: भविष्यति। तदा सिंह: उष्ट्रमाहूतवान्। भक्त्या आगतं च तं मारयित्वा तस्य रक्तं पीतवान्। एवं स्वपिशुनताया: दुष्फलम् उष्ट्रेण स्वयमेव प्राप्तम्।

उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरं लिखत— ½ × 4 = 2

i) चिकित्सकेन किम् उक्तमासीत्?

ii) शृगाल: शीघ्रमेव कस्य समीपे प्राप्त:?

iii) उष्ट्रेण कस्या: दुष्फलम् प्राप्तम्?

iv) अनेके पशव: कुत्र वसन्ति स्म?

II. पूर्णवाक्येन उत्तरं लिखत— 1× 4 = 4

i) क्रोधितेन सिंहेन किं पृष्टम्?

ii) चिकित्सकेन कीदृशं चिकित्साक्रमम् उक्तम्?

iii) कं विहाय सर्वे सिंहं द्रष्टुमागच्छन्?

iv) सिंह: उष्ट्रमाहूय किं कृतवान्?

III. यथानिर्देशम् उत्तरत—

i) 'प्रसन्न: सिंह:' इति अत्र विशेष्यपदं किम्? 1

ii) 'त्यक्त्वा' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम्? 1

iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 2

6. अमर्त्यसेन: इति नाम एव संस्कृतमयम्। अमर्त्यसेनवर्यस्य जन्म शान्तिनिकेतने अभवत्। अस्य नाम गुरुदेवेन रवीन्द्रनाथवर्येण चितम्।

© NCERT not to be republished

अस्य नाम निर्दिशन् स: उक्तवान् आसीत्— "अमर्त्यसेन:" इत्येष: शब्द: संस्कृतमूल: अत: एतस्य उच्चारणं स्पष्टं स्यात्, यत: अर्थपरिवर्तनं न भवेत्। शान्तिनिकेतने वसन् अमर्त्यसेन: बाल्ये संस्कृताभ्यासं कृतवान्। तस्य तीव्र: अभिलाष: अपि आसीत् यत् मातामह: क्षितीशमोहनसेन इव अहम् अपि प्रसिद्ध: संस्कृतविद्वान् भवेयम् इति।

उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरं लिखत— $1 \times 4 = 4$

i) अमर्त्यसेनस्य मातामहस्य नाम किम् आसीत्?

ii) कुत्र वसन् अमर्त्यसेन: संस्कृताभ्यासं कृतवान् आसीत्?

iii) अमर्त्यसेनस्य नाम केन चितम् ?

iv) किं भवितुम् अमर्त्यसेनस्य तीव्र: अभिलाष: आसीत्?

II. पूर्णवाक्येन उत्तरं लिखत—

i) अमर्त्यसेनस्य नामविषये निर्दिशन् रवीन्द्रनाथवर्य: किमुक्तवान्? 2

III. यथानिर्देशम् उत्तरत—

i) 'अस्य नाम' इत्यत्र 'अस्य' इति पदं कस्मै प्रयुक्तम्? 1

ii) 'स्यात्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्? 1

iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 2

7. कदाचित् देवराज: इन्द्र: भूलोकम् आगतवान्। भूलोके कमपि नगरं प्रविष्ट: स: मार्गे गच्छन् आसीत्। तत्र कश्चन विक्रेता बहूनां देवानां विग्रहान् संस्थाप्य विक्रयणं करोति स्म। देवेन्द्र: कुतूहलेन समीपं गत्वा दृष्टवान्। तत्र विष्णु:, शिव:, लक्ष्मी:, सरस्वती, गणेश: इत्यादीनां देवानां विग्रहा: आसन्। देवेन्द्रस्य विग्रह: अपि तत्र आसीत्। देवेन्द्र: एकैकस्यापि विग्रहस्य मूल्यं पृष्ट्वा-पृष्ट्वा ज्ञातवान्। अन्ते च कुतूहलेन तत्र स्थितस्य देवेन्द्रविग्रहस्य मूल्यं पृष्टवान्। स: विक्रेता उक्तवान्— य: कोऽपि कमपि विग्रहं क्रीणाति तस्मै एष: देवेन्द्र-विग्रह: नि:शुल्कं दीयते इति। तदा तु देवेन्द्रस्य स्थिति: शोचनीया एव आसीत्।

© NCERT not to be republished

उपरिलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरत—

i) देवराज: कुत्र आगतवान्? 1

ii) कस्य स्थिति: शोचनीया आसीत्? 1

II. पूर्णवाक्येन उत्तरत—

i) विक्रेता तत्र केषां देवानां विग्रहान् स्थापितवान्? 2

ii) देवेन्द्रविग्रहं कस्मै नि:शुल्कं दीयते? 2

III. यथानिर्देशम् उत्तरत—

i) 'स्थिति: शोचनीया' अत्र विशेष्यपदं किम्? 1

ii) 'अपश्यत्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्? 1

iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 2

8. हरियाणाराज्ये यमुनानगरमण्डले एक: संस्कृतपरिवार: अस्ति। तस्मिन् गृहे सर्वे संस्कृते सम्भाषणं कुर्वन्ति। तत्र पशवोऽपि संस्कृतम् अवबोद्धुं समर्था: सन्ति। तस्मिन् गृहे अभिमन्यु: नाम एक: युवक: अस्ति। सोऽपि संस्कृतं वदति। एकदा तत्र एक: संस्कृतप्राध्यापक: आगतवान्। तेन सह अभिमन्यु: संस्कृतेन सम्भाषणं कृतवान्। तस्य युवकस्य प्रतिभां दृष्ट्वा प्राध्यापक: अभिमन्यवे शतं रूप्यकाणि दत्तवान्। तस्मात् दिनात् तस्य मनसि संस्कृतं प्रति महती अभिरुचि: समुत्पन्ना। स: प्रतिदिनं गीताया: श्लोकान् पठित्वा-पठित्वा सर्वान् श्लोकान् अस्मरत्।

उपरिलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरत—

i) संस्कृतपरिवार: कुत्र अस्ति? 1

ii) प्राध्यापक: कस्मै शतं रूप्यकाणि दत्तवान्? 1

II. पूर्णवाक्येन उत्तरत—

i) प्राध्यापक: अभिमन्यवे शतं रूप्यकाणि किमर्थं दत्तवान्? 2

ii) युवक: कथं गीताया: श्लोकान् अस्मरत्? 2

III. यथानिर्देशम् उत्तरत—

i) 'अयच्छत्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्? 1

ii) 'कृतवान्' इति क्रियापदस्य कर्तृपदम् चित्वा लिखत। 1

iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 2

9. एकस्मिन् दिने बहव: जिज्ञासव: तत्त्वज्ञानं श्रोतुं महात्मन: सुकरातस्य गृहम् आगच्छन्। ज्ञानचर्चां शृण्वतां तेषां भूयान् काल: व्यतियात:। सुकरातस्य पत्नी गृहेऽपेक्षितानां वस्तूनाम् अभावचर्चां चिकीर्षति स्म, किन्तु तत्र उपस्थिते जनसमवाये एतत् सुकरं नासीत्। तत: कोपविहितचेतना सा अपशब्दान् उच्चारयन्ती तत्र समायाता, आगन्तुकेषु च पय: पातयन्ती प्रतिनिवृत्ता। सुकरात: सर्वान् सम्बोधयन् सस्मितम् उवाच, श्रुतम् एव भवद्भिर्यत् ये मेघा: गर्जन्ति, ते न वर्षन्ति, किन्तु अद्य प्रकृत्यां विपर्यास: परिलक्षितो भवति, मेघा: गर्जन्ति वर्षन्ति च।

उपरिलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत—

I. एकपदेन उत्तरत— 2

i) के महात्म-सुकरातस्य गृहम् आगच्छन्? 1

ii) सुकरातस्य पत्नी आगन्तुकेषु किं पातयन्ती प्रतिनिवृत्ता? 1

II. पूर्णवाक्येन उत्तरत—

i) सुकरातस्य पत्नी किं चिकीर्षति स्म? 2

ii) सुकरातस्य मते प्रकृत्यां क: विपर्यास: परिलक्षित:? 2

III. यथानिर्देशम् उत्तरत—

i) 'कोपविहितचेतना सा' इति पदे अनुच्छेदे कस्यै प्रयुक्ते?1

ii) 'अनेके' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम्? 1

iii) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। 2

© NCERT not to be republished

4. अनुच्छेदलेखनम्

किसी विषय के एक बिन्दु पर विचारों या भावों को एक स्थान पर क्रमबद्ध रूप से लिखना अनुच्छेद कहलाता है।

नैतिकशिक्षाया: महत्त्वम्

'शिक्ष्' 'विद्योपादाने' इति व्युत्पत्त्या शिक्षाशब्दस्य अर्थ: विद्यार्जनम् एव किन्तु केवलानि पुस्तकानि कण्ठस्थीकृत्य उपाधिं प्राप्य जीविकोपार्जनम् एव शिक्षा नास्ति। जीवने सत्यम्, अहिंसा, विनम्रतानियमसाहसप्रभृतीनाम् उच्चादर्शाणाम् सम्यक् समावेशनम् एव शिक्षाया: उद्देश्यं भवति। यया शिक्षया एतादृशाणां सद्गुणानां विकास: भवति सा नैतिकशिक्षेति उच्यते। नैतिकशिक्षामाध्यमेन मानवानां मूलप्रवृत्तय: संशोध्यन्ते। नैतिकशिक्षया सङ्कीर्णानां विचाराणाम् अपनयनं भवति। उचितानुचितनिर्णयक्षमताया: विकासोऽपि भवति। सम्प्रति लोके चौर्यहिंसाबलात्कार—घृणाद्वेषादिघृणितप्रवृत्तय: अनियंत्रणीया: सञ्जाता:। अत: अस्माभि: मूलप्रवृत्तीनां संयमनम् अवश्यं कर्त्तव्यम्। नैतिकशिक्षाबलेन एव वयं गतगौरवं पुन: प्राप्तुं शक्नुम:।

महामना मदनमोहनमालवीय:

महामनामदनमोहनमालवीयमहोदय: वैदिकधर्मस्य उद्धारकेषु अन्यतम:। 1869 तमे वर्षे प्रयागसमीपवर्तिनि ग्रामे ब्राह्मणकुले मदनमोहनमालवीयमहोदयानां जन्म अभवत्। स: प्रयागस्थ-म्योर-सेंट्रल-महाविद्यालये शिक्षां प्राप्तवान्। 1884 वर्षात् आरभ्य 1887 वर्षपर्यन्तं स उच्चविद्यालये अध्यापकरूपेण कार्यं कृतवान्। तदनन्तरं स: अनेकानां पत्रपत्रिकाणां सम्पादकरूपेण कार्यं कृतवान्। 1899 तमें वर्षे स: विधिशास्त्रस्य परीक्षाम् उत्तीर्य अधिवक्तृरूपेण अपि कार्यं कृतवान्। राष्ट्रीयताप्रसारणाय, प्राचीनसंस्कृते: गौरववर्धनाय उत्तमशिक्षया च श्रेष्ठसन्ततिनिर्माणाय च स: 1916 तमे वर्षे काश्यां हिन्दूविश्वविद्यालयस्य स्थापनाम् अकरोत्। यद्यपि 1916 तमे वर्षे मालवीयमहोदया: दिवंगता: परं तेषाम् नाम हिन्दूविश्वविद्यालयमाध्यमेन अद्यापि श्रद्धया स्मर्यते।

सत्सङ्गति:

सताम् सङ्गति: इति सत्सङ्गति: कथ्यते। मनुष्य: स्वसंगत्या एव सज्जन: दुर्जनो वा भवति। यो जन: दुर्जनानाम् संसर्गे अधिकं कालं यापयति, सोऽपि दुर्जन:

भवति। सुमन: सङ्गात् कीट: अपि सतां शिरसि आरोहति, परं यदि कोऽपि सज्जन: अपि चौराणाम् संसर्गे कालं यापयति तदा आरक्षिभि: सोऽपि चौर: एव कथ्यते। अत एव अस्माभि: सर्वदा सत्सङ्गति: एव करणीया।

परोपकार:

परेषाम् उपकार: परोपकार: अस्ति। परोपकारप्रवृत्त्या एव मनुष्य: पशुभ्य: पृथक् भवति। आहारादिप्रवृत्तय: तु पशुषु अपि तथैव भवन्ति यथा मानवेषु। परं मानव: स्वविवेकेन उचितानुचितज्ञानेन एव आत्मानम् उच्चासने उच्चपदे च स्थापयति। वृक्षा: स्वयं फलं न खादन्ति, ते परेषां कृते एव फलानि छाया: च ददति। नद्य: परोपकाराय एव वहन्ति, गाव: अन्येभ्य: एव दुग्धं यच्छन्ति। एवमेव अनेके प्रात:स्मरणीया: महापुरुषा: अपि अभवन् ये स्वप्राणान् उत्सृज्य देशस्य समाजस्य च रक्षाम् अकुर्वन्। राजा शिवि: शरणागतस्य कपोतस्य रक्षायै स्वशरीरस्य मांसं कर्तयित्वा श्येनाय दत्तवान्। ऋषि: दधीचि: अपि वृत्रासुरवधाय स्वास्थीनि सहर्षम् अयच्छत्। अद्यापि लोके अनेके समाजसुधारका: सन्ति ये स्वार्थं परित्यज्य लोककल्याणं कुर्वन्ति। अत: सत्यमेव कथितम्—

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकार: पुण्याय पापाय परपीडनम्।।

छात्रजीवनम्

य: विद्यार्जनं कर्तुम् इच्छति विद्यार्जने च संलग्न: भवति स: विद्यार्थी उच्यते। विद्याध्ययनाय छात्र: विद्यालयं गच्छति। स: सर्वविधं सुखं परित्यज्य अहर्निशं विद्याध्ययनं करोति। विद्यार्थी अल्पाहारी गृहत्यागी काकचेष्टावान् बकध्यानयुक्त: अल्पनिद्रालुश्च भवेत्। यथोक्तं केनापि कविना—

काकचेष्टा बकध्यानं शुनो निद्रा तथैव च।
अल्पाहार: गृहत्याग: विद्यार्थिपञ्चलक्षणम्।।

प्रमादं विहाय अध्ययनेन परिप्रश्नेन च विद्यार्थी विद्यार्थी भवितुं शक्नोति। तेन तपोमयजीवनम् अनुकरणीयम् इति।

5. निबन्धावली

पर्यावरणम्

अद्यत्वे हि विज्ञानमयं युगं वर्तते। जनैः सौविध्यार्थं नानोपकरणानि प्रयुज्यन्ते। तेषामुत्पादनं कार्यशालासु यन्त्रैः क्रियते। यातायातव्यवस्थायाः कृते विविधानि यानानि प्रयुज्यन्ते। यद्यपि एतैरस्माकं जीवनं सुखमयं भवति, परम् एभिः प्रसारितः धूमः वायुमण्डलम् अत्यन्तं दूषयति। एवमेव वनानां विनाशेन ऋतुचक्रं प्रभावितं भवति। वायुमण्डलस्य दुष्प्रभावितत्वात् अस्माकं शरीरमपि श्वासादिरोगैः रुग्णं भवति।

महानगराणां मलिनजलं नानाप्रवाहिकामाध्यमेन नदीं प्रविशति। अस्मात् कारणात् नदीनां स्वच्छमपि जलं मलिनम् अपेयं च भवति। साम्प्रतं पाश्चात्यदेशेषु पर्यावरणं प्रति जागरुकता समुत्पन्ना। तत्प्रेरिता भारतीयैरपि पर्यावरणदूषणस्य सङ्कटम् अवगत्य साम्प्रतं गंगा-यमुनादि-नदीनां कृते शुद्धीकरणकार्यक्रमाः प्रचाल्यन्ते। अस्माभिरपि आवश्यकेऽस्मिन् पर्यावरणरक्षाकार्यक्रमे वृक्षा-रोपणमाध्यमेन, स्वच्छतादिनियमानां पालनेन च योगदानं विधेयम्।

दूरदर्शनम्

कालोऽयं विज्ञानमयः। विज्ञानस्य विभिन्नोपकरणैः मानवजीवनम् अतितरां सौविध्यमनुभवति। विज्ञानक्षेत्रे ये आविष्काराः संजाताः तेषु दूरदर्शनं सर्वान् अतिशेते।

अद्यत्वे एकत्र स्थितः मानवः एतदुपकरणमाध्यमेन दूरस्थिताः घटनाः वीक्षितुं शक्नोति। अमेरिकादेशेन ईराकदेशे यद् आक्रमणम् कृतम् तस्य साक्षात्प्रसारणं दूरदर्शनयन्त्रमाध्यमेन तद्वत् प्रत्यक्षीकृतं, यथा हि पुरा महाभारतस्य युद्धं सञ्जयेन धृतराष्ट्रं प्रति वर्णितमासीत्।

दूरदर्शनेन न केवलं मनोरञ्जनमेव भवति, अपितु दैनिकघटनानां ज्ञानम् अपि एतेन भवति। विभिन्नाभिः प्रणालिकाभिः (चैनलैः) प्रतिक्षणं नूतन-नूतनवार्ताणां प्रसारणं क्रियते। साम्प्रतं तु शिक्षाक्षेत्रेऽपि अस्य महान् उपयोगो विधीयते।

'ज्ञानदर्शन' इति कार्यक्रममाध्यमेन देशस्य सुदूरस्थक्षेत्रवास्तव्या: छात्रा: अपि विद्यार्जनं कर्तुं पारयन्ति। दूरदर्शनेन तु साम्प्रतं प्रतिदिनं संस्कृतवार्ता: अपि प्रसार्यन्ते, एतत्प्रसारणं निशम्य लोका: शुद्धं संस्कृतोच्चारणं कर्तुं पारयन्ति।

यद्यपि दूरदर्शनस्य नैके गुणा: सन्ति, परमत्र केचन अवगुणा: अपि सन्ति। अत्र प्रसार्यमाणानां कार्यक्रमाणाम् अधिकदर्शनेन नेत्रहानि: सम्भवति। बाल्यावस्थायामेव बालका: उपनेत्राणि संधारयितुं विवशीभवन्ति।

एकोऽपरोऽतिदोष: वर्तते यत् प्रायश: ये मनोरञ्जककार्यक्रमा: प्रसार्यन्ते, तेषु सदाचारशिक्षाया: अभावो वर्तते। नैके कार्यक्रमा: केवलम् अनैतिकताम् मूल्यहानिं च प्रदर्शयन्ति। अत: अस्माभि: दूरदर्शनेन केवलम् गुणार्जनमेव विधेयम्।

संस्कृतभाषाया: महत्त्वम्

भारतवर्षे आदिकालादेव मानवानां व्यवहारे संस्कृतभाषाया: प्रयोगो भवति स्म। संस्कृतं विश्वस्य प्राचीनतमा भाषास्ति। श्रद्धावशादियं जनै: देववाणी सुरभारतीत्यपि कथ्यते। इयं भाषा भारतीयाया: सभ्यताया: संस्कृते: चिन्तनस्य च संवाहिकास्ति। संस्कृतं धर्मस्य, दर्शनस्य, राजनीते:, इतिहासस्य, अर्थशास्त्रस्य नीतिशास्त्रस्य च मूलमस्ति।

अस्यां भाषायां भारतीयचिन्तनस्य सर्वे प्रमुखा: ग्रन्था: उपनिबद्धा: सन्ति। विश्वसाहित्यस्य प्राचीनतमानां ग्रन्थानां वेदानामपि भाषा संस्कृतमेवास्ति। सम्पूर्णं वैदिकं वाङ्मयं ज्ञानविज्ञानदृष्ट्या समस्ते जगति निरुपमं विद्यते। अस्यां भाषायां दर्शनग्रन्था: साहित्यग्रन्थास्तु उपनिबद्धा: सन्त्येव सहैव भौतिकविज्ञानस्य रसायनविज्ञानस्य, चिकित्साविज्ञानस्य, वनस्पतिविज्ञानस्य, भाषाविज्ञानस्य, वास्तुविज्ञानस्यापि अनेके मौलिका: ग्रन्था: विद्यन्ते।

संस्कृतभाषायाम् उपनिबद्धे साहित्ये सत्यस्य, अहिंसाया: राष्ट्रभक्ते:, परस्परं सहयोगस्य, त्यागस्य, विश्वबन्धुत्वस्य, शान्तेश्च भावनानाम् अजस्रं स्रोत: प्रवहत् विद्यते। लोककल्याणाय अस्यां भाषायां बहव: आदर्शा: प्रस्तुता: सन्ति, यथा— 'वसुधैव कुटुम्बकम्', 'सर्वे भवन्तु सुखिन:', 'तेन त्यक्तेन

© NCERT not to be republished

भुञ्जीथा: मा गृध: कस्यस्विद्धनम्' इत्यादय:। एतेषामादर्शानामनुकरणं कृत्वा य: कोऽपि मानव: स्वजीवनम् उन्नतं कर्तुं शक्नोति।

विषयदृष्ट्या भाषासौष्ठवदृष्ट्या च इयं भाषा अन्यासु सर्वासु विश्वभाषासु अतिशेते। आधुनिका: प्रायश: सर्वा: भारतीया: भाषा: संस्कृतभाषाया: एव निर्गता: सन्ति।

संस्कृतसाहित्यमाश्रित्यैव आधुनिकं साहित्यमपि विकसितम्। अत एव इयं भाषा भारतीयभाषाणां जननी सम्पोषिका च कथ्यते। विश्वबन्धुत्वभावनां पोषयितुम्, भारतीयां संस्कृतिमवगन्तुम्, राष्ट्रियताया: भावनां वर्धयितुम् भारतीयभाषाणां विकासाय च संस्कृतभाषाया: परमोपयोगिता विद्यते।

भारतीया संस्कृति:

संस्कृति: नाम संस्कारेण संस्करणं परिष्करणम् इति। यया संस्कृत्या सभ्यतया च भारतीया: जना: संस्कारं परिष्कारं च लभन्ते सा एव भारतीया संस्कृति:। इयम् 'आर्यसंस्कृति:' अपि उच्यते। एषा संस्कृति: जनानां हृदयेभ्य: दुर्गुणान्, दुर्व्यसनानि, पापानि च निस्सार्य दूरीकरोति। सदाचार-शिक्षणेन च सा मानवमनांसि निर्मलानि सात्त्विकानि च करोति। 'समन्वय-भावना' अस्माकं भारतीयानां संस्कृते: प्रमुखा विशेषता अस्ति। संस्कृतिरियं विश्वस्य सर्वेभ्य: मानवेभ्य: सौख्यम् उपदिशति।

सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दु:खभाग्भवेत्।।

अस्माकं भारते पूर्वम् आर्यजना: पापेभ्य: बिभ्यति स्म, सत्यं वदन्ति स्म, अहिंसाम् आचरन्ति स्म। ते दया-परोपकार-धैर्य-त्यागशीलता-सहानुभूत्यादि-नियमान् पालयन्ति स्म। अत एव ते विश्ववन्द्या: आसन्। भारतीया: जना: शास्त्रोक्तानां धर्मनियमानां पालने मनसा वाचा कर्मणा संनद्धा: भवन्ति स्म। सत्यमिदं यत् संसारे य: कोऽपि स्वसंस्कृतिं त्यजति स: कदापि सुखी समृद्धश्च न भवति। अत: यदि वयं सुखं सम्मानं, समृद्धिं च इच्छाम: तर्हि स्वभारतीयसंस्कृते: सद्गुणा: अस्माभि: ग्रहणीया: पालनीया: एव।

© NCERT not to be republished

कवि: कालिदास:

संस्कृतसाहित्यम् अतिविस्तृतं वर्तते। अत्र नैके कवय: अनेकान् ग्रन्थान् विरचितवन्त: परं न हि तैर्लिखितं सर्वं साहित्यम् इदानीं प्राप्यते। केवलं अङ्गुलिगण्या एव कवय: एतादृशा: सन्ति, येषां नाम अद्यापि आदरपूर्वकं गृह्यते, मुहुर्मुहुश्च तेषां साहित्यं पठ्यते। एतादृश एव कवि: कालिदासोऽस्ति, यो हि आलोचकै: कविकुलगुरु: इत्युपाधिना समलङ्क्रियते।

कालिदास: भारतवर्षस्य कस्मिन् प्रदेशे कस्मिंश्च काले जन्म लेभे इत्यादिप्रश्ना: अद्यावधि: असमाहिता: एव। विद्वांस: ख्रैस्तीयप्रथमशताब्दीत: आरभ्य षष्ठशतकं यावत् कुत्रापि कालिदासस्य स्थितिं स्थापयन्ति। एवमेव तस्य जन्मस्थान-विषयेऽपि विवदन्ते। कालिदासस्य लोकप्रियतां वीक्ष्य कश्मीरवासिनस्तं कश्मीरप्रदेशे समुत्पन्नम्, बंगालवासिनश्च तं बंगप्रान्ते समुद्भूतम्, उज्जयिनीवासिनश्च कालिदासम् उज्जयिन्यां लब्धजन्मानं कथयन्ति।

महाकविना कालिदासेन सप्तग्रन्था: विरचिता:, एतेषु रघुवंश कुमारसम्भव-नामके द्वे महाकाव्ये, ऋतुसंहार-मेघदूतनामके द्वे खण्डकाव्ये, अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रञ्चेति त्रीणि नाटकानि सन्ति।

एतेषु सर्वेषु अभिज्ञानशाकुन्तलं नाम नाटकं तस्य सर्वस्वम् अभिधीयते। एतन्नाटकम् अधीत्यैव पाश्चात्त्या: संस्कृताध्ययनं प्रति समुत्सुका अभूवन्। कालिदासस्य साहित्ये सर्वत्र प्रकृतेश्चित्रणं वर्तते। मानव: यदा-यदा स्वकर्तव्यस्य अवहेलनां विदधाति तदा स शापं दण्डं च प्राप्नोति। प्रकृतिशरणं गत्वैव तस्य निष्कृतिर्भवति। शाकुन्तले दुर्वासस: शापमाध्यमेन, मेघदूते च यक्षकथामाध्यमेन कविरिदमेव मुहुर्मुहुरुपदिशति। कालिदासस्य रस भावसमन्विता वाणी कस्य मनो न हरति? कालिदासस्य अद्वितीयत्वमेव केनापि कविनोक्तम्—

पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदास:।

अद्यापि तत्तुल्यकवेरभावाद्
अनामिका सार्थवती बभूव॥

आदिकवि: वाल्मीकि:

महर्षि: वाल्मीकि: संस्कृतसाहित्यस्य आदिकविरस्ति। अयं मर्यादापुरुषोत्तमस्य रामस्य चरितवर्णनाय 'रामायणम्' नाम आर्षकाव्यम् अरचयत्। रामायणस्य फलश्रुत्यध्याये रामायणस्य कर्तृत्वेन वाल्मीके: उल्लेख: प्राप्यते। क्रौञ्चद्वन्द्वस्य एकं व्याधेन व्यापादितं दृष्ट्वा अस्य कवे: मनसि समुत्थित: शोक: एव श्लोकरूपेण आविर्भूत:। उक्तञ्च—

क्रौञ्चद्वन्द्ववियोगोत्थ: शोक: श्लोकत्वमागत:।

आदिकविरयम् ऋषे: प्रचेतस: दशम: पुत्र आसीत्। अयं जात्या ब्राह्मण: राज्ञो दशरथस्य च मित्रमासीत्। मुनेर्वाल्मीके: आश्रमे दशसहस्रसंख्याका: छात्रा: उषित्वा शिक्षामगृह्णन्। अस्याश्रम: गङ्गाया: तमसानद्याश्च तीरे आसीत्। वाल्मीके: आश्रमविषये इदमपि मतं प्राप्यते यत् अस्याश्रम: यमुनायास्तटे चित्रकूटस्य समीपे आसीत्। तत्रैव उषित्वा वाल्मीकि: रामायणस्य रचनामकरोत्।

वाल्मीकिना विरचितं 'रामायणम्' लोकेऽस्मिन् सर्वतो मधुरम्, लोकप्रियम्, सर्वतश्चाधिकं हृदयस्पर्शि ऐतिहासिकं काव्यमस्ति। अस्मिन् रामस्य, कथां वर्णयित्वा कविना लोकसमक्षम् एक: आदर्श: प्रस्तुतीकृत: यत् 'रामादिवद् प्रवर्तितव्यं न रावणादिवत्'।

रावण: सीताया: अपहरणम् अकरोत् अत: तस्य समूलं नाशोऽभवत्। राम: रामायणस्य सर्वगुणसम्पन्न: आदर्शनायकोऽस्ति। रामस्य चरितानि पठित्वा जना: स्वकर्तव्यस्य, लोकव्यवहारस्य शौर्यस्य च शिक्षां गृह्णन्ति।

इयं रामायणी कथा इयती रुचिपूर्णा अस्ति यत् जावा-सुमात्रा-बोर्नियो-बाली-चम्पा-थाईलैंडप्रभृतिदेशेषु सर्वत्र प्रचारमलभत।

परवर्तिभिरनेकै: महाकविभि: अस्य कथामवलम्ब्य अनेकानि काव्यानि नाटकानि च विरचितानि। अत एव इदं महाकाव्यं चिरस्थायिनीं कीर्तिमलभत। अत एवोच्यते—

यावत् स्थास्यन्ति गिरय: सरितश्च महीतले।
तावद् रामायणी कथा लोकेषु प्रचलिष्यति।।

भगवद्गीता

अयं ग्रन्थ: महर्षिणा वेदव्यासेन रचितस्य महाग्रन्थस्य महाभारतस्य अङ्गभूत: अस्ति। महाभारतयुद्धकाले यदा अर्जुन: मोहग्रस्त: युद्धविरत: च अभवत् तदा श्रीकृष्णेन यत्किञ्चिदुपदिष्टं तत् गीता-ग्रन्थरूपेण प्रसिद्धम्। अस्मिन् कर्म-ज्ञान-सांख्य-योगानां विषये उपदेश: विद्यते। कर्मयोग: गीताया: प्रमुख: उपदेश: अस्ति। अत एव अस्य ग्रन्थस्य अपरं नाम 'कर्मयोगशास्त्रम्' अपि अस्ति। अस्य मननं कृत्वा मनुष्य: कर्मयोगी भवति। स: मनसा इन्द्रियै: शरीरेण च क्रियमाणेषु कर्मसु कर्तृत्वाभिमानं त्यजति। अयं ग्रन्थ: संन्यासं नोपदिशति अपितु योग: कर्मसु कौशलम्" इत्युपदिशति। गीतायां निष्कामकर्मण: विशिष्टं महत्त्वम् अस्ति —

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन"।

अस्मिन् ग्रन्थे भगवता श्रीकृष्णेन उपदिष्टम् यत्— आत्मा नित्य: शरीराणि च अनित्यानि। अत: मरणात् न भेतव्यम्। नर: वीरो भूत्वा अन्यायस्य प्रतीकारं कुर्यात्। एवं प्रकारेण गीता सर्वान् मनुष्यान् सर्वेषु लौकिककर्मसु कौशलम् शिक्षयति। अर्जुन: उपदेशेन नष्टमोहो भूत्वा कृष्णस्य धर्मयुद्धे प्रवृत्त: अभवत्। गीताया: उपदेशसारं प्राप्य मनुष्य: आसुरीं सम्पदं परित्यज्य दैवीं सम्पदम् अर्जितुम् प्रवृत्तो भवति। अत: सर्वै: लोकै: गीतोपदेशम् अनुकृत्य जीवनम् सफलं कर्त्तव्यम्। गीताविषये केनापि कविना सत्यमुक्तम्—

गीता सुगीता कर्त्तव्या किमन्यै: शास्त्रविस्तरै:।

हिमालय:

भारतभूखण्डोपरि प्रकृते: महती अनुकम्पा वर्तते। नाना पर्वतमाला: विभिन्ना: सरित: नैकानि वनानि, द्वे सागरे, मरुस्थली च अत्र राजन्ते। एकस्मिन्नेव समये नैके ऋतव: अपि द्रष्टुं शक्यन्ते। यद्येकत्र ग्रीष्मातपप्रचण्डता दृश्यते, तदा अन्यत्र

हिमाच्छादितत्वात् शैत्यप्रकोपोऽप्यनुभूयते। अस्मिन् भारतवर्षे ये प्राकृतिक-सीमान: सन्ति तेषु उत्तरस्यां दिशि हिमालयस्य प्रामुख्यं वर्तते।

भारतवर्षस्य उत्तरे दिग्विभागे अवस्थितेयं विशाला पर्वतमाला। कश्मीरादाभ्य अरुणाचलप्रदेशं यावद् अतिविस्तृतेयं पर्वतशृङ्खला अनादिकालात् भारतं रक्षितवती। न कोऽपि शत्रु: इमाम् उल्लङ्घ्य भारतं प्राविशत्, केवलं विगते शताब्दे चीनदेश एव एतादृशं दु:साहसं कर्तुम् अपारयत्।

हिमालय एव उत्तरभारतस्य पिपासां शमयति विशालं कृषिक्षेत्रं च सिञ्चति। अस्य हिमाच्छादितत्वाद् गङ्गा-यमुना-शतद्रु-व्यास-वितस्तादय: सरित: सततं निस्सरन्ति। अस्माकं देश: 'हिन्दुस्तान' इति नाम्नापि व्यवह्रियते, अत्र यत् हिन्दू इति पदं वर्तते तत् सिन्धु इति शब्दान्निष्पन्नम्। सिन्धुनदी अपि हिमालयादेव प्रभवति।

चिरात् नाना कवय: स्वीयरचनासु हिमालयं वर्णितवन्त:। कालिदासेन तु स्वीये कुमारसम्भवे अयं हिमालय: देवभूमिरूपेण इत्थं वर्णित:—

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराज:।
पूर्वापरौ तोयनिधीवगाह्य स्थित: पृथिव्यामिव मानदण्ड:।।

हिमालयप्रदेशे एव अस्माकं पुरातनतीर्थादीनि सन्ति। अत्रैव शङ्कराचार्येण स्थापितम् 'केदारनाथ इति तीर्थस्थानं वर्तते'। यमुनोत्री-गंगोत्री-बदरीनाथ-प्रभृतीनि पवित्राणि स्थानान्यपि अत्रैव वर्तन्ते।

नैकखनिजानाम् इयम् जन्मभूमि:। अत्रैवासीत् कण्वस्य तपोवनम्। आयुर्वेदस्य उपयोगाय औषधजातानि वनस्पतयश्च अस्मादेव प्राप्यन्ते। योगिन: अपि तप: साधनां कर्तुम् अत्रैव गच्छन्ति।

भारते भावनात्मकम् ऐक्यं स्थापयितुं हिमालयस्य महत्त्वपूर्णं योगदानं वर्तते।

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

संसारेऽस्मिन् जननी अस्मभ्यं यानि यानि सुखानि प्रयच्छति, जन्मभूमिश्च तथैव सौविध्यानि ददाति।

जन्मदात्री माता जन्मभूमिश्च स्वर्गाद् अपि श्रेष्ठा वरिष्ठा च वर्तते। माता

© NCERT not to be republished

कुमाता कदापि न भवति। सा जन्मन प्रभृति अतीव निश्छलप्रेम्णा पुत्रं पुत्रीं च लालयति, पालयति, स्वदुग्धं पाययित्वा शिशुं वर्धयति स्वयं च महत्कष्टानि अनुभूय तं सुखयति, महद्भयाच्च रक्षति।

शीततौं रात्रिकालेषु बालस्य मूत्रेण आर्द्रीभूताऽपि विष्टरे स्वयं स्वपिति, परन्तु बालं च शुष्कस्थाने शय्यायां स्वापयति। किमधिकं माता स्वसन्ततिसुखाय रक्षणाय च स्वदुर्लभप्राणानपि दातुम् उद्यता भवति। अतः सत्यमिदं कथितं यत् जननी स्वर्गादपि अधिकं सुखं प्रयच्छति।

भासस्य कथनानुसारेण माता किल मनुष्याणां देवतानाम् च दैवतम्।

वस्तुतः जन्मभूमिः जननीवत् अस्मान् सर्वान् नानाविधानि अन्नानि, फलानि च दत्त्वा यावज्जीवनं पालयति पोषयति संवर्धयति च। भूमिः अस्मभ्यं धनं, धातून्, रत्नानि च प्रयच्छति। जन्मदात्री कतिचिद्वर्षानन्तरं स्वकर्त्तव्यं पूरयित्त्वा निवृत्ता भवति; किन्तु जन्मभूमिः अस्माकं जीवनस्य अन्तिमं क्षणं यावत् स्वान्नजलफलादिभिः अस्मान् पोषयति। वयं च अन्तिमं श्वासम् अत्रैव नयामः। पशुपक्षिषु अपि स्वमातृभूमिं प्रति स्नेहभावः दृश्यते। मानवः तु विशेषरूपेण विवेकशीलः मनस्वी च वर्तते। अतः मातृभूम्यै तस्य स्नेहः स्वाभाविकः। सुष्ठूक्तम् अथर्ववेदेऽपि "माता भूमिः पुत्रोऽहम् पृथिव्याः"। खगाः अपि स्वदेशभूमिं बहु स्निह्यन्ति—

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम्।
रमते न मरालस्य मानसं मानसं विना।।

चन्द्रशेखर-भगतसिंह राजगुर्वादयः देशभक्ताः जन्मभूमिस्वतन्त्रतायै स्वकीयान् प्राणान् दत्त्वा अमराः जाताः। मातृभूमेः सीमां परिरक्ष्य सैनिकाः जन्मभूम्याः ऋणात् मुक्ताः भवन्ति। स्वर्णमयीं लङ्कां विजित्य रामः लक्ष्मणम् अवदत्—

अपि स्वर्णमयी लङ्का, न मे लक्ष्मण रोचते।
जननी जनमभूमिश्च स्वर्गादपि गरीयसी।।

प्रियं मे भारतम्

अस्माकं प्रियं भारतम् 'आर्यावर्त: ''भारतवर्षम्'' हिन्दुस्तान' 'इण्डिया' इति चतुर्भि: नामभि: प्रसिद्धम् परन्तु सम्प्रति जनै: अस्य नाम 'भारतम्' इत्येव स्वीकृतम्।

भारतं कश्मीरात् कन्याकुमारीपर्यन्तं सुविस्तृतं राजते। अस्य मुकुट इव नगाधिराज: हिमालय: उत्तरस्यां दिशि शोभते। दक्षिणे चास्य हिन्दमहासागर: विद्यते।

अद्यत्वे भारते अष्टाविंशति: राज्यानि सन्ति, तानि सर्वाण्यपि प्रादेशिक-विधानसभाभि: सञ्चाल्यन्ते। दिल्लीनगरं भारतस्य राजधानी केन्द्रं चास्ति। केन्द्रीयं शासनं सांसदै: संचाल्यते। सांसदबहुसंख्याकदलेन मन्त्रिमण्डलं निर्मीयते। सर्वोपरि राष्ट्रपति: देशस्य शासनं करोति। किं बहुना भारतं सर्वोच्चसत्तासम्पन्नं प्रजातन्त्रात्मकं गणराज्यमस्ति।

भारते विविधा: जातय: सम्प्रदाया:, धर्मा: भाषाश्च। परं सर्वे भारतीया: परस्परं प्रेम्णा व्यवहरन्ति। अत्रत्या: गङ्गादिनद्य: सकलं जगत् पुनन्ति। अत्रैव अवतीर्णा: श्रीराम:, श्रीकृष्ण:, महात्माबुद्ध:, महावीर:, शङ्करादिमहामानवा:। अत्रैव रघु:, चन्द्रगुप्त:, अशोक:, विक्रमादित्य:, प्रभृतय: महान्त: शासका: अभवन्। आधुनिककाले गान्धि:, जवाहरलाल:, सुभाष:, चन्द्रशेखर:, मालवीयादय: महापुरुषा: अजायन्त। स्वकार्यैश्च भारतस्य महत्त्वं वर्धितवन्त:। राष्ट्रभक्ति: अस्माकं प्रथमं कर्त्तव्यम् अस्ति। अस्माभि: सर्वैरपि भारतस्य सेवा मनसा, वाचा कर्मणा च करणीया। सम्प्रदाय-जाति-भाषा-प्रदेशादिभेदकतत्त्वानि विस्मृत्य ऐक्यं विधाय भारतस्य रक्षा, उन्नति: च कर्त्तव्या। भारतस्य वैशिष्ट्यं प्रतिपादयन् केनापि सत्यमेवोक्तम्—

गायन्ति देवा: किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूय: पुरुषा: सुरत्वात्।।

© NCERT not to be republished

मैट्रो-रेलसेवा

अतिविस्तृतानि महानगराणि असंख्यनिवासिभि: सङ्कुलानि भवन्ति। महान-गरेषु जना: स्वकार्यं कर्तुं दूरं गन्तुं विवशा भवन्ति। यद्यपि महानगरेषु नैके राजमार्गा भवन्ति, परं यथा-यथा जनसंख्या वर्धते, वाहनानामपि संख्या प्रवर्धते, तथा तथा गमनागमने कष्टं भवति, वाहनानां च आधिक्येन पर्यावरणमपि दूषितं भवति।

अत: एतत्समाधानाय यूरोप-देशेषु मैट्रोनामधारिणी उपनगरगामिनी तीव्र-गतिका रेलसेवा प्रवर्तिता। मूलत: सा रेलसेवा 'मैट्रो' नाम्ना अभिधीयते। भूमौ खननं विधाय विशालभवनानाम् अध: सुरंगेषु रेलपट्टिका: स्थाप्यन्ते, तदुपरि द्रुतगत्या रेलकक्षा: धावन्ति।

दिल्लीनगर्यां प्रचलिताया: मैट्रोरेलसेवाया: द्वे स्वरूपे स्त:। मैट्रो-मार्गस्य प्रथमं स्वरूपं तु भूमेरुपरि, अपरञ्च भूम्यन्त:। इदानीं तु दिल्लीनगरम् प्रतिवेशिनगरेषु यथा नोएडानगरं प्रति, गुरुग्रामं प्रति, गाज़ियाबादनगरं प्रति, फरीदाबादनगरं प्रति अपि मैट्रोरेलयानेन जना: सुगमतया गमनागमनं कुर्वन्ति। वायुयानस्थानकं प्रति गम्यमानाया: तीव्रगामीमैट्रोसेवाया: प्रयोगं दैशिका:, वैदेशिका: च सानन्दं कुर्वन्ति।

साम्प्रतं सहस्रशो जना: अल्पेनैव कालेन एकस्मात् स्थानाद् अपरत्र यान्ति। द्रुतगत्या प्रधावत: वातानुकूलितकक्षान् वीक्ष्य को जन: मैट्रोद्वारा यात्रां कर्तुं नेच्छति।

स्वतन्त्रता-दिवस:

अस्माकं भारतदेश: सप्तचत्वारिंशदुत्तर—नवशतैकसहस्रतमे (1947) वर्षे अगस्तमासस्य पञ्चदशदिनाङ्के स्वतन्त्र: अभवत्। दिनेऽस्मिन् प्रतिवर्षं सम्पूर्णे भारतवर्षे स्वतन्त्रतादिवसोत्सव: मन्यते। अयं दिवस: भारतीयेतिहासे स्वर्णाक्षरै: लिखितमस्ति यत: अस्मिन् एव दिवसे भारतवर्ष: मुक्तो भूत्वा स्वातन्त्र्यम् अलभत। भारतस्य राजधान्यां दिल्लीनगरे स्वतन्त्रतादिवसोत्सव: विशेषरूपेण दर्शनीय: भवति। प्रात:काले सप्तवादनसमये अपारजनसमूह: रक्तदुर्गस्य

मुख्यद्वारे एकत्रितो भवति। महान्तो नेतार: वैदेशिका: अतिथयश्च मञ्चे उपविशन्ति। भारतस्य प्रधानमन्त्री त्रिवर्णात्मिकां राष्ट्रपताकाम् आरोहयति, तत: 'जन-गण-मन' इति राष्ट्रगीतं गीयते, पश्चाच्च प्रधानमन्त्री देशवासिन: सन्दिशति। दूरदर्शनेन एतेषां कार्यक्रमाणाम् प्रसारणं भवति येन दूरस्था: अपि जना: सोल्लासम् कार्यक्रमान् पश्यन्ति।

दिवसेऽस्मिन् न केवलं राजधान्यामेव अपितु सर्वेषु प्रदेशेष्वपि विविधानि कार्यक्रमा: आयोज्यन्ते, यथा कविभि: देशभक्तिपरा: कविता: पठ्यन्ते, वीररसमयानि गीतानि गीयन्ते, स्वतन्त्रता-संग्रामसेनानिन: स्मर्यन्ते, क्रीडा-भाषण-प्रतियोगिता: समायोज्यन्ते, अन्ते च मिष्टान्नानि वितीर्यन्ते। राष्ट्रपर्व इदं सर्वेषु भारतीयेषु नवोत्साहं, नवां कल्पनाञ्च जनयति। अत एव अवसरेऽस्मिन् अस्माभि: सर्वैरपि प्रतिज्ञा कर्त्तव्या यद् शरीरेण, मनसा, धनेन, प्राणार्पणेनापि भारतमातु: सेवां सदा करिष्याम:।

© NCERT not to be republished

परिशिष्ट

I. शब्दरूपाणि

i) स्वरान्त शब्दरूप

बालक (अकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	बालकः	बालकौ	बालकाः
	स् (:)	औ	अः
द्वितीया	बालकम्	बालकौ	बालकान्
	अम्	औ	अः (आन्)
तृतीया	बालकेन	बालकाभ्याम्	बालकैः
	आ (एन)	भ्याम्	भिः (ऐः)
चतुर्थी	बालकाय	बालकाभ्याम्	बालकेभ्य
	ए (आय)	भ्याम्	भ्यः
पञ्चमी	बालकात्	बालकाभ्याम्	बालकेभ्यः
	अस् (आत्)	भ्याम्	भ्यः
षष्ठी	बालकस्य	बालकयोः	बालकानाम्
	अस् (स्य)	ओ (योः)	आम् (नाम्)
सप्तमी	बालके	बालकयोः	बालकेषु
	इ (ए)	ओः (योः)	सु (एषु)
सम्बोधन	हे बालक !	हे बालकौ !	हे बालकाः !

(अकारान्त पुँल्लिङ्ग शब्दों के रूप बालक के समान पढ़े जाएँगे।)

© NCERT not to be republished

फल (अकारान्त नपुंसकलिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	फलम्	फले	फलानि
द्वितीया	फलम्	फले	फलानि
सम्बोधन	हे फल !	हे फले !	हे फलानि!

(शेष तृतीया से सप्तमी विभक्ति पर्यन्त बालक के रूप के समान पढ़े जाएँगे।)

लता (आकारान्त स्त्रीलिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	लता	लते	लता:
द्वितीया	लताम्	लते	लता:
तृतीया	लतया	लताभ्याम्	लताभि:
चतुर्थी	लतायै	लताभ्याम्	लताभ्य:
पञ्चमी	लताया:	लताभ्याम्	लताभ्य:
षष्ठी	लताया:	लतयो:	लतानाम्
सप्तमी	लतायाम्	लतयो:	लतासु
सम्बोधन	हे लते !	हे लते !	हे लता:!

(आकारान्त स्त्रीलिङ्ग शब्दों के रूप लता के समान होते हैं)

मुनि (इकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	मुनि:	मुनी	मुनय:
द्वितीया	मुनिम्	मुनी	मुनीन्
तृतीया	मुनिना	मुनिभ्याम्	मुनिभि:
चतुर्थी	मुनये	मुनिभ्याम्	मुनिभ्य:
पञ्चमी	मुने:	मुनिभ्याम्	मुनिभ्य:
षष्ठी	मुने:	मुन्यो:	मुनीनाम्
सप्तमी	मुनौ	मुन्यो:	मुनिषु
सम्बोधन	हे मुने !	हे मुनी !	हे मनुय: !

© NCERT not to be republished

('भूपति' आदि सभी इकारान्त पुँल्लिङ्ग शब्दों के रूप मुनि के समान पढ़े जाएँगे।)

पति (इकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	पति:	पती	पतय:
द्वितीया	पतिम्	पती	पतीन्
तृतीया	पत्या (पतिना)	पतिभ्याम्	पतिभि:
चतुर्थी	पतये (पत्यै)	पतिभ्याम्	पतिभ्य:
पञ्चमी	पत्यु:	पतिभ्याम्	पतिभ्य:
षष्ठी	पत्यु:	पत्यो:	पतीनाम्
सप्तमी	पत्यौ	पत्यो:	पतिषु
सम्बोधन	हे पते !	हे पती!	हे पतय:!

नदी (ईकारान्त स्त्रीलिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	नदी	नद्यौ	नद्य:
द्वितीया	नदीम्	नद्यौ	नदी:
तृतीया	नद्या	नदीभ्याम्	नदीभि:
चतुर्थी	नद्यै	नदीभ्याम्	नदीभ्य:
पञ्चमी	नद्या:	नदीभ्याम्	नदीभ्य:
षष्ठी	नद्या:	नद्यो:	नदीनाम्
सप्तमी	नद्याम्	नद्यो:	नदीषु
सम्बोधन	हे नदि !	हे नद्यौ!	हे नद्य:!

भानु (उकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	भानु:	भानू	भानव:
द्वितीया	भानुम्	भानू	भानून्

© NCERT not to be republished

तृतीया	भानुना	भानुभ्याम्	भानुभि:
चतुर्थी	भानवे	भानुभ्याम्	भानुभ्य:
पञ्चमी	भानो:	भानुभ्याम्	भानुभ्य:
षष्ठी	भानो:	भान्वो:	भानूनाम्
सप्तमी	भानौ	भान्वो:	भानुषु
सम्बोधन	हे भानो!	हे भानू !	हे भानव:!

धेनु (उकारान्त स्त्रीलिङ्ग)

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	धेनु:	धेनू	धेनव:
द्वितीया	धेनुम्	धेनू	धेनू:
तृतीया	धेन्वा (धेनुना)	धेनुभ्याम्	धेनुभि:
चतुर्थी	धेनवे/धेन्वे	धेनुभ्याम्	धेनुभ्य:
पञ्चमी	धेनो:	धेनुभ्याम्	धेनुभ्य:
षष्ठी	धेनो:	धेन्वो:	धेनूनाम्
सप्तमी	धेनौ	धेन्वो:	धेनुषु
सम्बोधन	हे धेनो !	हे धेनू !	हे धेनव:!

मधु (उकारान्त नपुंसकलिङ्ग)

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	मधु	मधुनी	मधूनि
द्वितीया	मधु	मधुनी	मधूनि
तृतीया	मधुना	मधुभ्याम्	मधुभि:
चतुर्थी	मधुने	मधुभ्याम्	मधुभ्य:
पञ्चमी	मधुन:	मधुभ्याम्	मधुभ्य:
षष्ठी	मधुन:	मधुनो:	मधूनाम्
सप्तमी	मधुनि	मधुनो:	मधुषु
सम्बोधन	हे मधु!	हे मधुनी!	हे मधूनि!

© NCERT not to be republished

पितृ (पिता) (ऋकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	पिता	पितरौ	पितर:
द्वितीया	पितरम्	पितरौ	पितॄन्
तृतीया	पित्रा	पितृभ्याम्	पितृभि:
चतुर्थी	पित्रे	पितृभ्याम्	पितृभ्य:
पञ्चमी	पितु:	पितृभ्याम्	पितृभ्य:
षष्ठी	पितु:	पित्रो:	पितॄणाम्
सप्तमी	पितरि	पित्रो:	पितृषु
सम्बोधन	हे पित: !	है पितरौ!	हे पितर:!

मातृ (माँ, माता) (ऋकारान्त स्त्रीलिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	माता	मातरौ	मातर:
द्वितीया	मातरम्	मातरौ	मातॄ:
तृतीया	मात्रा	मातृभ्याम्	मातृभि:
चतुर्थी	मात्रे	मातृभ्याम्	मातृभ्य:
पञ्चमी	मातु:	मातृभ्याम्	मातृभ्य:
षष्ठी	मातु:	मात्रो:	मातॄणाम्
सप्तमी	मातरि	मात्रो:	मातृषु
सम्बोधन	हे मात:!	हे मातरौ!	हे मातर:!

गो (गाय और बैल) (ओकारान्त पुँल्लिङ्ग/स्त्रीलिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	गौ:	गावौ	गाव:
द्वितीया	गाम्	गावौ	गा:
तृतीया	गवा	गोभ्याम्	गोभि:

© NCERT not to be republished

चतुर्थी	गवे	गोभ्याम्	गोभ्य:
पञ्चमी	गो:	गोभ्याम्	गोभ्य:
षष्ठी	गो:	गवो:	गवाम्
सप्तमी	गवि	गवो:	गोषु
संबोधन	हे गौ:!	हे गावौ!	हे गाव:!

द्यु/द्यो (आकाश/स्वर्ग) (ओकारान्त स्त्रीलिङ्ग)

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	द्यौ:	द्यावौ	द्याव:
द्वितीया	द्याम्	द्यावौ	द्या:
तृतीया	द्यवा	द्योभ्याम्	द्योभि:
चतुर्थी	द्यवे	द्योभ्याम्	द्योभ्य:
पञ्चमी	द्यो:	द्योभ्याम्	द्योभ्य:
षष्ठी	द्यो:	द्यवो:	द्यवाम्
सप्तमी	द्यवि	द्यवो:	द्योषु
सम्बोधन	हे द्यौ:!	हे द्यावौ!	हे द्याव:!

नौ (नाव) स्त्रीलिङ्ग (औकारान्त)

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	नौ:	नावौ	नाव:
द्वितीया	नावम्	नावौ	नाव:
तृतीया	नावा	नौभ्याम्	नौभि:
चतुर्थी	नावे	नौभ्याम्	नौभ्य:
पञ्चमी	नाव:	नौभ्याम्	नौभ्य:
षष्ठी	नाव:	नावो:	नावाम्
सप्तमी	नावि	नावो:	नौषु
सम्बोधन	हे नौ:!	हे नावौ!	हे नाव:!

© NCERT not to be republished

अक्षि (इकारान्त नपुंसकलिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	अक्षि	अक्षिणी	अक्षीणि
द्वितीया	अक्षि	अक्षिणी	अक्षीणि
तृतीया	अक्ष्णा	अक्षिभ्याम्	अक्षिभि:
चतुर्थी	अक्ष्णे	अक्षिभ्याम्	अक्षिभ्य:
पञ्चमी	अक्ष्ण:	अक्षिभ्याम्	अक्षिभ्य:
षष्ठी	अक्ष्ण:	अक्ष्णो:	अक्ष्णाम्
सप्तमी	अक्षिणि	अक्ष्णो:	अक्षिषु
सम्बोधन	हे अक्षि!	हे अक्षिणी!	हे अक्षीणि!

ii) व्यञ्जनान्त शब्दरूप

राजन् (राजा) (नकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	राजा	राजानौ	राजान:
द्वितीया	राजानम्	राजानौ	राज्ञ:
तृतीया	राज्ञा	राजभ्याम्	राजभि:
चतुर्थी	राज्ञे	राजभ्याम्	राजभ्य:
पञ्चमी	राज्ञ:	राजभ्याम्	राजभ्य:
षष्ठी	राज्ञ:	राज्ञो:	राज्ञाम्
सप्तमी	राज्ञि	राज्ञो:	राजसु
सम्बोधन	हे राजन्!	हे राजानौ!	हे राजान:!

भवत् (आप) (तकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	भवान्	भवन्तौ	भवन्त:
द्वितीया	भवन्तम्	भवन्तौ	भवत:

© NCERT not to be republished

तृतीया	भवता	भवद्भ्याम्	भवद्भिः
चतुर्थी	भवते	भवद्भ्याम्	भवद्भ्यः
पञ्चमी	भवतः	भवद्भ्याम्	भवद्भ्यः
षष्ठी	भवतः	भवतोः	भवताम्
सप्तमी	भवति	भवतोः	भवत्सु
सम्बोधन	हे भवन्!	हे भवन्तौ!	हे भवन्तः!

आत्मन् (आत्मा, अपने आप) (नकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	आत्मा	आत्मानौ	आत्मानः
द्वितीया	आत्मानम्	आत्मानौ	आत्मनः
तृतीया	आत्मना	आत्मभ्याम्	आत्मभिः
चतुर्थी	आत्मने	आत्मभ्याम्	आत्मभ्यः
पञ्चमी	आत्मनः	आत्मभ्याम्	आत्मभ्यः
षष्ठी	आत्मनः	आत्मनोः	आत्मनाम्
सप्तमी	आत्मनि	आत्मनोः	आत्मसु
सम्बोधन	हे आत्मन्!	हे आत्मानौ!	हे आत्मानः!

विद्वस् (विद्वान्) (सकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	विद्वान्	विद्वांसौ	विद्वांसः
द्वितीया	विद्वांसम्	विद्वांसौ	विदुषः
तृतीया	विदुषा	विद्वद्भ्याम्	विद्वद्भिः
चतुर्थी	विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
पञ्चमी	विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
षष्ठी	विदुषः	विदुषोः	विदुषाम्
सप्तमी	विदुषि	विदुषोः	विद्वत्सु
सम्बोधन	हे विद्वन्!	हे विद्वांसौ!	हे विद्वांसः!

© NCERT not to be republished

चन्द्रमस् (चन्द्रमा) (सकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः
द्वितीया	चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः
तृतीया	चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः
चतुर्थी	चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
पञ्चमी	चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
षष्ठी	चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्
सप्तमी	चन्द्रमसि	चन्द्रमसोः	चन्द्रमस्सु
सम्बोधन	हे चन्द्रमाः!	हे चन्द्रमसौ!	हे चन्द्रमसः!

वाच् (वाणी) (चकारान्त स्त्रीलिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	वाक्, वाग्	वाचौ	वाचः
द्वितीया	वाचम्	वाचौ	वाचः
तृतीया	वाचा	वाग्भ्याम्	वाग्भिः
चतुर्थी	वाचे	वाग्भ्याम्	वाग्भ्यः
पञ्चमी	वाचः	वाग्भ्याम्	वाग्भ्यः
षष्ठी	वाचः	वाचोः	वाचाम्
सप्तमी	वाचि	वाचोः	वाक्षु
सम्बोधन	हे वाक्, वाग्!	हे वाचौ!	हे वाचः!

गच्छत् (जाते हुए) (तकारान्त पुँल्लिङ्ग)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	गच्छन्	गच्छन्तौ	गच्छन्तः
द्वितीया	गच्छन्तम्	गच्छन्तौ	गच्छतः
तृतीया	गच्छता	गच्छद्भ्याम्	गच्छद्भिः

© NCERT not to be republished

चतुर्थी	गच्छते	गच्छद्भ्याम्	गच्छद्भ्य:
पञ्चमी	गच्छत:	गच्छद्भ्याम्	गच्छद्भ्य:
षष्ठी	गच्छत:	गच्छतो:	गच्छताम्
सप्तमी	गच्छति	गच्छतो:	गच्छत्सु
सम्बोधन	हे गच्छन्!	हे गच्छन्तौ!	हे गच्छन्त:!

पुम्स् (पुरुष) (सकारान्त पुँल्लिङ्ग)

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	पुमान्	पुमांसौ	पुमांस:
द्वितीया	पुमांसम्	पुमांसौ	पुंस:
तृतीया	पुंसा	पुम्भ्याम्	पुम्भि:
चतुर्थी	पुंसे	पुम्भ्याम्	पुम्भ्य:
पञ्चमी	पुंस:	पुम्भ्याम्	पुम्भ्य:
षष्ठी	पुंस:	पुंसो:	पुंसाम्
सप्तमी	पुंसि	पुंसो:	पुंसु
सम्बोधन	हे पुमान्!	हे पुमांसौ!	हे पुमांस:!

पथिन् (रास्ता) नकारान्त पुँल्लिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	पन्था:	पन्थानौ	पन्थान:
द्वितीया	पन्थानम्	पन्थानौ	पथ:
तृतीया	पथा	पथिभ्याम्	पथिभि:
चतुर्थी	पथे	पथिभ्याम्	पथिभ्य:
पञ्चमी	पथ:	पथिभ्याम्	पथिभ्य:
षष्ठी	पथ:	पथो:	पथाम्
सप्तमी	पथि	पथो:	पथिषु
सम्बोधन	हे पन्था:!	हे पन्थानौ!	हे पन्थान:!

© NCERT not to be republished

गिर् (वाणी, सरस्वती) रकारान्त स्त्रीलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	गी:	गिरौ	गिर:
द्वितीया	गिरम्	गिरौ	गिर:
तृतीया	गिरा	गीर्भ्याम्	गीर्भि:
चतुर्थी	गिरे	गीर्भ्याम्	गीर्भ्य:
पञ्चमी	गिर:	गीर्भ्याम्	गीर्भ्य:
षष्ठी	गिर:	गिरो:	गिराम्
सप्तमी	गिरि	गिरो:	गीर्षु
सम्बोधन	हे गी:!	हे गिरौ!	हे गिर:!

अहन् (दिन) नकारान्त नपुंसकलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	अह:	अह्नी-अहनी	अहानि
द्वितीया	अह:	अह्नी-अहनी	अहानि
तृतीया	अह्ना	अहोभ्याम्	अहोभि:
चतुर्थी	अह्ने	अहोभ्याम्	अहोभ्य:
पञ्चमी	अह्न:	अहोभ्याम्	अहोभ्य:
षष्ठी	अह्न:	अह्नो:	अह्नाम्
सप्तमी	अह्नि-अहनि	अह्नो:	अहस्सु-अह:सु
सम्बोधन	हे अह:!	हे अह्नी-अहनी!	हे अहानि!

पयस् (दूध और जल) सकारान्त नपुंसकलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	पय:	पयसी	पयांसि
द्वितीया	पय:	पयसी	पयांसि
तृतीया	पयसा	पयोभ्याम्	पयोभि:
चतुर्थी	पयसे	पयोभ्याम्	पयोभ्य:

© NCERT not to be republished

पञ्चमी	पयस:	पयोभ्याम्	पयोभ्य:
षष्ठी	पयस:	पयसो:	पयसाम्
सप्तमी	पयसि	पयसो:	पयस्सु-पय:सु
सम्बोधन	हे पय:!	हे पयसी!	हे पयांसि!

iii) सर्वनाम

सर्व (सब) अकारान्त पुँल्लिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	सर्व:	सर्वौ	सर्वे
द्वितीया	सर्वम्	सर्वौ	सर्वान्
तृतीया	सर्वेण	सर्वाभ्याम्	सर्वै:
चतुर्थी	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्य:
पञ्चमी	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्य:
षष्ठी	सर्वस्य	सर्वयो:	सर्वेषाम्
सप्तमी	सर्वस्मिन्	सर्वयो:	सर्वेषु

सर्व (सब) आकारान्त स्त्रीलिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	सर्वा	सर्वे	सर्वा:
द्वितीया	सर्वाम्	सर्वे	सर्वा:
तृतीया	सर्वया	सर्वाभ्याम्	सर्वाभि:
चतुर्थी	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्य:
पञ्चमी	सर्वस्या:	सर्वाभ्याम्	सर्वाभ्य:
षष्ठी	सर्वस्या:	सर्वयो:	सर्वासाम्
सप्तमी	सर्वस्याम्	सर्वयो:	सर्वासु

सर्व (सब) अकारान्त नपुंसकलिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	सर्वम्	सर्वे	सर्वाणि
द्वितीया	सर्वम्	सर्वे	सर्वाणि

© NCERT not to be republished

(तृतीया से सप्तमी पर्यन्त शेष रूप पुँल्लिङ्ग के समान चलेंगे। सर्वनाम शब्दों का सम्बोधन नहीं होता।)

यत् (जो) पुँल्लिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	यः	यौ	ये
द्वितीया	यम्	यौ	यान्
तृतीया	येन	याभ्याम्	यैः
चतुर्थी	यस्मै	याभ्याम्	येभ्यः
पञ्चमी	यस्मात्	याभ्याम्	येभ्यः
षष्ठी	यस्य	ययोः	येषाम्
सप्तमी	यस्मिन्	ययोः	येषु

यत् (जो) स्त्रीलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	या	ये	याः
द्वितीया	याम्	ये	याः
तृतीया	यया	याभ्याम्	याभिः
चतुर्थी	यस्यै	याभ्याम्	याभ्यः
पञ्चमी	यस्याः	याभ्याम्	याभ्यः
षष्ठी	यस्याः	ययोः	यासाम्
सप्तमी	यस्याम्	ययोः	यासु

यत् (जो) नपुंसकलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	यत्	ये	यानि
द्वितीया	यत्	ये	यानि

(तृतीया से सप्तमी पर्यन्त शेष रूप पुँल्लिङ्ग के समान होते हैं।)

© NCERT not to be republished

एतत् (यह) पुँल्लिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	एष:	एतौ	एते
द्वितीया	एतम्	एतौ	एतान्
तृतीया	एतेन	एताभ्याम्	एतै:
चतुर्थी	एतस्मै	एताभ्याम्	एतेभ्य:
पञ्चमी	एतस्मात्	एताभ्याम्	एतेभ्य:
षष्ठी	एतस्य	एतयो:	एतेषाम्
सप्तमी	एतस्मिन्	एतयो:	एतेषु

एतत् (यह) नपुंसकलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	एतत्	एते	एतानि
द्वितीया	एतत्	एते	एतानि

(शेष रूप पुँल्लिङ्ग के समान होते हैं।)

एतत् (यह) स्त्रीलिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	एषा	एते	एता:
द्वितीया	एताम्	एते	एता:
तृतीया	एतया	एताभ्याम्	एताभि:
चतुर्थी	एतस्यै	एताभ्याम्	एताभ्य:
पञ्चमी	एतस्या:	एताभ्याम्	एताभ्य:
षष्ठी	एतस्या:	एतयो:	एतासाम्
सप्तमी	एतस्याम्	एतयो:	एतासु

तत् (वह) पुँल्लिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	स:	तौ	ते

© NCERT not to be republished

द्वितीया	तम्	तौ	तान्
तृतीया	तेन	ताभ्याम्	तैः
चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः
पञ्चमी	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठी	तस्य	तयोः	तेषाम्
सप्तमी	तस्मिन्	तयोः	तेषु

(तत्, यत्, एतत्, इदम्, अदस्, किम्, युष्मद्, अस्मद् आदि सर्वनाम शब्दों का सम्बोधन नहीं होता)

तत् (वह) स्त्रीलिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	सा	ते	ताः
द्वितीया	ताम्	ते	ताः
तृतीया	तया	ताभ्याम्	ताभिः
चतुर्थी	तस्यै	ताभ्याम्	ताभ्यः
पञ्चमी	तस्याः	ताभ्याम्	ताभ्यः
सप्तमी	तस्याम्	तयोः	तासु

तत् (वह) नपुंसकलिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	तत्	ते	तानि
द्वितीया	तत्	ते	तानि

(शेष रूप पुँल्लिङ्ग के समान होते हैं।)

किम् (कौन) पुँल्लिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	कः	कौ	के
द्वितीया	कम्	कौ	कान्
तृतीया	केन	काभ्याम्	कैः

चतुर्थी	कस्मै	काभ्याम्	केभ्य:
पञ्चमी	कस्मात्	काभ्याम्	केभ्य:
षष्ठी	कस्य	कयो:	केषाम्
सप्तमी	कस्मिन्	कयो:	केषु

किम् (क्या-कौन) स्त्रीलिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	का	के	का:
द्वितीया	काम्	के	का:
तृतीया	कया	काभ्याम्	काभि:
चतुर्थी	कस्यै	काभ्याम्	काभ्य:
पञ्चमी	कस्या:	काभ्याम्	काभ्य:
षष्ठी	कस्या:	कयो:	कासाम्
सप्तमी	कस्याम्	कयो:	कासु

किम् (क्या) नपुंसकलिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	किम्	के	कानि
द्वितीया	किम्	के	कानि

(शेष रूप पुँल्लिङ्ग के समान होंगे)

इदम् (यह) पुँल्लिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	अयम्	इमौ	इमे
द्वितीया	इमम्, एनम्	इमौ, एनौ	इमान्, एनान्
तृतीया	अनेन, एनेन	आभ्याम्	एभि:
चतुर्थी	अस्मै	आभ्याम्	एभ्य:
पञ्चमी	अस्मात्	आभ्याम्	एभ्य:

© NCERT not to be republished

षष्ठी	अस्य	अनयोः, एनयोः	एषाम्
सप्तमी	अस्मिन्	अनयोः, एनयोः	एषु

इदम् (यह) स्त्रीलिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	इयम्	इमे	इमाः
द्वितीया	इमाम्, एनाम्	इमे, एने	इमाः, एनाः
तृतीया	अनया, एनया	आभ्याम्	आभिः
चतुर्थी	अस्यै	आभ्याम्	आभ्यः
पञ्चमी	अस्याः	आभ्याम्	आभ्यः
षष्ठी	अस्याः	अनयोः, एनयोः	आसाम्
सप्तमी	अस्याम्	अनयोः, एनयोः	आसु

इदम् (यह) नपुंसकलिङ्ग

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	इदम्	इमे	इमानि
द्वितीया	इदम्	इमे	इमानि

(इसके शेष रूप पुँल्लिङ्ग के समान होते हैं।)

अस्मद् (मैं)

विभक्ति	**एकवचन**	**द्विवचन**	**बहुवचन**
प्रथमा	अहम्	आवाम्	वयम्
द्वितीया	माम्, मा	आवाम्, नौ	अस्मान्, नः
तृतीया	मया	आवाभ्याम्	अस्माभिः
चतुर्थी	मह्यम्, मे	आवाभ्याम्, नौ	अस्मभ्यम्, नः
पञ्चमी	मत्	आवाभ्याम्	अस्मत्
षष्ठी	मम, मे	आवयोः, नौ	अस्माकम्, नः
सप्तमी	मयि	आवयोः	अस्मासु

युष्मद् (तुम)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	त्वम्	युवाम्	यूयम्
द्वितीया	त्वाम्, त्वा	युवाम्, वाम्	युष्मान्, व:
तृतीया	त्वया	युवाभ्याम्	युष्माभि:
चतुर्थी	तुभ्यम्, ते	युवाभ्याम्, वाम्	युष्मभ्यम्, व:
पञ्चमी	त्वत्	युवाभ्याम्	युष्मत्
षष्ठी	तव, ते	युवयो:, वाम्	युष्माकम्, व:
सप्तमी	त्वयि	युवयो:	युष्मासु

अदस् (यह) पुँल्लिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	असौ	अमू	अमी
द्वितीया	अमुम्	अमू	अमून्
तृतीया	अमुना	अमूभ्याम्	अमीभि:
चतुर्थी	अमुष्मै	अमूभ्याम्	अमीभ्य:
पञ्चमी	अमुष्मात्	अमूभ्याम्	अमीभ्य:
षष्ठी	अमुष्य	अमुयो:	अमीषाम्
सप्तमी	अमुष्मिन्	अमुयो:	अमीषु

ईदृश् (इस प्रकार) पुँल्लिङ्ग

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	ईदृक्, ईदृग्	ईदृशौ	ईदृश:
द्वितीया	ईदृशम्	ईदृशौ	ईदृश:
तृतीया	ईदृशा	ईदृग्भ्याम्	ईदृग्भि:
चतुर्थी	ईदृशे	ईदृग्भ्याम्	ईदृग्भ्य:
पञ्चमी	ईदृश:	ईदृग्भ्याम्	ईदृग्भ्य:

© NCERT not to be republished

षष्ठी	ईदृश:	ईदृशो:	ईदृशाम्
सप्तमी	ईदृशि	ईदृशो:	ईदृक्षु

कतिपय* (कुछ) (पुँल्लिङ्ग)

विभक्ति	**बहुवचन**
प्रथमा	कतिपय:
द्वितीया	कतिपयान्
तृतीया	कतिपयै:
चतुर्थी	कतिपयेभ्य:
पञ्चमी	कतिपयेभ्य:
षष्ठी	कतिपयेषाम्
सप्तमी	कतिपयेषु

कतिपय (स्त्रीलिङ्ग)

विभक्ति	**बहुवचन**
प्रथमा	कतिपया:
द्वितीया	कतिपया:
तृतीया	कतिपयाभि:
चतुर्थी	कतिपयाभ्य:
पञ्चमी	कतिपयाभ्य:
षष्ठी	कतिपयासाम्
सप्तमी	कतिपयासु

कतिपय (नपुंसकलिङ्ग)

विभक्ति	**बहुवचन**
प्रथमा	कतिपयानि
द्वितीया	कतिपयानि

(शेष रूप पुँल्लिङ्ग के समान)

* कतिपय शब्दों के रूप केवल बहुवचन में ही होते हैं।

© NCERT not to be republished

उभ*, दोनों (पुँल्लिङ्ग)

विभक्ति	द्विवचन
प्रथमा	उभौ
द्वितीया	उभौ
तृतीया	उभाभ्याम्
चतुर्थी	उभाभ्याम्
पञ्चमी	उभाभ्याम्
षष्ठी	उभयो:
सप्तमी	उभयो:

उभ (स्त्रीलिङ्ग)

विभक्ति	द्विवचन
प्रथमा	उभे
द्वितीया	उभे
तृतीया	उभाभ्याम्
चतुर्थी	उभाभ्याम्
पञ्चमी	उभाभ्याम्
षष्ठी	उभयो:
सप्तमी	उभयो:

उभ (नपुंसकलिङ्ग)

विभक्ति	द्विवचन
प्रथमा	उभे
द्वितीया	उभे

(शेष रूप पुँल्लिङ्ग के समान)

iv) संख्यावाची शब्द

	पुँल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
1.	एक:	एका	एकम्

* उभ शब्दों के रूप केवल द्विवचन में ही होते हैं।

© NCERT not to be republished

2.	द्वौ	द्वे	द्वे
3.	त्रय:	तिस्र:	त्रीणि
4.	चत्वार:	चतस्र:	चत्वारि

नीचे के संख्या-शब्द तीनों लिङ्गों में समान होते हैं।

5. पञ्च
6. षट्
7. सप्त
8. अष्टौ (अष्ट)
9. नव
10. दश
11. एकादश
12. द्वादश
13. त्रयोदश
14. चतुर्दश
15. पञ्चदश
16. षोडश
17. सप्तदश
18. अष्टादश
19. नवदश, एकोनविशंति:
20. विंशति:
21. एकविंशति:
22. द्वाविंशति:
23. त्रयोविंशति:
24. चतुर्विंशति:
25. पंचविंशति:
26. षड्विंशति:
27. सप्तविंशति:
28. अष्टाविंशति:
29. नवविंशति:
30. त्रिंशत्
31. एकत्रिंशत्
32. द्वात्रिंशत्
33. त्रयस्त्रिंशत्
34. चतुस्त्रिंशत्
35. पञ्चत्रिंशत्
36. षट्त्रिंशत्
37. सप्तत्रिंशत्
38. अष्टत्रिंशत्
39. एकोनचत्वारिंशत्/नवत्रिंशत्
40. चत्वारिंशत्
41. एकचत्वारिंशत्
42. द्विचत्वारिंशत्/द्वाचत्वारिंशत्
43. त्रयश्चत्वारिंशत्/त्रिचत्वारिंशत्
44. चतुश्चत्वारिंशत्
45. पञ्चचत्वारिंशत्
46. षट्चत्वारिंशत्
47. सप्तचत्वारिंशत्
48. अष्टचत्वारिंशत्

© NCERT not to be republished

49. एकोनपञ्चाशत्/नवचत्वारिंशत्
50. पञ्चाशत्
51. एकपञ्चाशत्
52. द्वि/द्वापञ्चाशत्
53. त्रि/त्रय: पञ्चाशत्
54. चतु: पञ्चाशत्
55. पञ्चपञ्चाशत्
56. षट्पञ्चाशत्
57. सप्तपञ्चाशत्
58. अष्टपञ्चाशत्
59. चतु: सप्तति
60. षष्टि:
61. एकषष्टि:
62. द्विषष्टि:/द्वाषष्टि:
63. त्रि/त्रय:षष्टि:
64. चतु: षष्टि:
65. पञ्चषष्टि:
66. षट्षष्टि:
67. सप्तषष्टि:
68. अष्टषष्टि:/अष्टाषष्टि:
69. नवषष्टि:/एकोनसप्तति:
70. सप्तति:
71. एकसप्तति:
72. द्वि/द्वासप्तति:
73. त्रि/त्रय:सप्तति:
74. चतु: सप्तति
75. पञ्चसप्तति:
76. षट्सप्तति:
77. सप्तसप्तति:
78. अष्टसप्तति:/अष्टासप्तति:
79. नवसप्तति:/एकोनाशीति:
80. अशीति:
81. एकाशीति:
82. द्व्यशीति:
83. त्र्यशीति:
84. चतुरशीति:
85. पञ्चाशीति:
86. षडशीति:
87. सप्ताशीति:
88. अष्टाशीति:
89. नवाशीति:/एकोननवति:
90. नवति:
91. एकनवति:
92. द्विनवति:
93. त्रि/त्रयोनवति:
94. चतुर्णवति:
95. पञ्चनवति:
96. षण्णवति:
97. सप्तनवति:
98. अष्टनवति:/अष्टानवति:
99. नवनवति:/एकोनशतम्
100. शतम्

© NCERT not to be republished

क्रमसंख्यावाचक शब्द (एक से बीस तक)

पुँल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्रथम:	प्रथमा	प्रथमम्
द्वितीय:	द्वितीया	द्वितीयम्
तृतीय:	तृतीया	तृतीयम्
चतुर्थ:	चतुर्थी	चतुर्थम्
पञ्चम:	पञ्चमी	पञ्चमम्
षष्ठ:	षष्ठी	षष्ठम्
सप्तम:	सप्तमी	सप्तमम्
अष्टम:	अष्टमी	अष्टमम्
नवम:	नवमी	नवमम्
दशम:	दशमी	दशमम्
एकादश:	एकादशी	एकादशम्
द्वादश:	द्वादशी	द्वादशम्
त्रयोदश:	त्रयोदशी	त्रयोदशम्
चतुर्दश:	चतुर्दशी	चतुर्दशम्
पञ्चदश:	पञ्चदशी	पञ्चदशम्
षोडश:	षोडशी	षोडशम्
सप्तदश:	सप्तदशी	सप्तदशम्
अष्टादश:	अष्टादशी	अष्टादशम्
नवदश:	नवदशी	नवदशम्
विंश:	विंशी	विशम्

© NCERT not to be republished

संख्यावाचक शब्दों के रूप

एक (नित्य एकवचनान्त)

विभक्ति	पुँल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्रथमा	एक:	एका	एकम्
द्वितीया	एकम्	एकाम्	एकम्
तृतीया	एकेन	एकया	(शेष पुँल्लिङ्ग एक के समान)
चतुर्थी	एकस्मै	एकस्यै	
पञ्चमी	एकस्मात्	एकस्या:	
षष्ठी	एकस्य	एकस्या:	
सप्तमी	एकस्मिन्	एकस्याम्	

द्वि (दो) (नित्य द्विवचनान्त)

विभक्ति	पुँल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्रथमा	द्वौ	द्वे	द्वे
द्वितीया	द्वौ	द्वे	द्वे
तृतीया	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
चतुर्थी	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
पञ्चमी	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
षष्ठी	द्वयो:	द्वयो:	द्वयो:
सप्तमी	द्वयो:	द्वयो:	द्वयो:

त्रि (तीन) (नित्य बहुवचनान्त)

विभक्ति	पुँल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्रथमा	त्रय:	तिस्र:	त्रीणि
द्वितीया	त्रीन्	तिस्र:	त्रीणि
तृतीया	त्रिभि:	तिसृभि:	त्रिभि:
चतुर्थी	त्रिभ्य:	तिसृभ्य:	त्रिभ्य:
पञ्चमी	त्रिभ्य:	तिसृभ्य:	त्रिभ्य:

© NCERT not to be republished

षष्ठी	त्रयाणाम्	तिसृणाम्	त्रयाणाम्
सप्तमी	त्रिषु	तिसृषु	त्रिषु

चतुर् (चार) (नित्य बहुवचनान्त)

विभक्ति	**पुँल्लिङ्ग**	**स्त्रीलिङ्ग**	**नपुंसकलिङ्ग**
प्रथमा	चत्वार:	चतस्र:	चत्वारि
द्वितीया	चतुर:	चतस्र:	चत्वारि
